अस्माकं तृप्तये श्राद्धं तथाप्येतदुदीरणात् ॥ २९ ॥
यत्रैतत्पठ्यते श्राद्धे स्तोत्रमस्मत्सुखावहं ।
अस्माकं जायते तृप्तिस्तत्र द्वादशवार्षिकी ॥ ३० ॥
हेमन्ते द्वादशाब्दानि तृप्तिमेतत्प्रयच्छति ।
शिशिरे द्विगुणाब्दांश्च तृप्तिं स्तोत्रमिदं शुभं ॥ ३१ ॥
वसन्ते षोडशसमास्तृप्तये श्राद्धकर्म्मणि ।
ग्रीष्मे च षोडशैवैतत्पठितं तृप्तिकारकं ॥ ३२ ॥
विकलेऽपि कृते श्राद्धे स्तोत्रेणानेन साधिते ।
वर्षासु तृप्तिरस्माकमक्षया जायते रुचे ॥ ३३ ॥
शरत्कालेऽपि पठितं श्राद्धकाले प्रयच्छति ।
अस्माकमेतत्पुरुषैस्तृप्तिं पञ्चदशाब्दिकीं ॥ ३४ ॥
यस्मिन् गृहे च लिखितमेतत्तिष्ठति नित्यदा ।
सन्निधानं कृते श्राद्धे तत्रास्माकं भविष्यति ॥ ३५ ॥
तस्मादेतत्त्वया श्राद्धे विप्राणां भुञ्जतां पुरः ।
श्रावणीयं महाभाग अस्माकं पुष्टिहेतुकं ॥ ३६ ॥

इति श्रीमार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृवरप्रदानं ॥ ९७ ॥

## अष्टनवतितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततस्तस्मान्नदीमध्यात्समुत्तस्थौ मनोरमा ।
प्रम्लोचा नाम तन्वङ्गी तत्समीपे वराप्सराः ॥ १ ॥

सा चोवाच महात्मानं रुचिं सुमधुराक्षरं ।
प्रश्रयावनता सुभ्रूः प्रम्लोचा वै वराप्सराः ॥ २ ॥
अतीव रूपिणी कन्या मत्सुता तपतां वर ।
जाता वरुणपुत्त्रेण पुष्करेण महात्मना ॥ ३ ॥
तां गृहाण मया दत्तां भार्य्यार्थे वरवर्णिनीं ।
मनुर्महामतिस्तस्यां समुत्पत्स्यति ते सुतः ॥ ४ ॥

मार्कण्डेय उवाच ॥

तथेति तेन साऽप्युक्ता तस्मात्तोयाद्वपुष्मतीं ।
उज्जहार ततः कन्यां मालिनीं नाम नामतः ॥ ५ ॥
नद्याश्च पुलिने तस्मिन् स रुचिर्मुनिसत्तमः ।
जग्राह पाणिं विधिवत्समानाय्य महामुनीन् ॥ ६ ॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामतिः ।
रौच्योऽभवत्पितुर्नाम्ना ख्यातोऽत्र वसुधातले ॥ ७ ॥
तस्य मन्वन्तरे देवास्तथा सप्तर्षयश्च ये ।
तनयाश्च नृपाश्चैव ते सम्यक् कथितास्तव ॥ ८ ॥
धर्म्मवृद्धिस्तथारोग्यं धनधान्यसुतोद्भवः ।
नृणां भवत्यसन्दिग्धमस्मिन्मन्वन्तरे श्रुते ॥ ९ ॥
पितृस्तवं तथा श्रुत्वा पितृणाञ्च तथा गणान् ।
सर्व्वान् कामानवाप्नोति तत्प्रसादान्महामुने ॥ १० ॥

इति श्रीमार्कण्डेयपुराणे मालिनीपरिणयो नाम रौच्यमन्वन्तरं समाप्तं ॥ ९८ ॥

नवनवतितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततः परन्तु भौत्यस्य समुत्पत्तिं निशामय ।
देवानृषींस्तथा पुत्रांस्तथैव वसुधाधिपान् ॥ १ ॥
बभूवाङ्गिरसः शिष्यो भूतिर्नाम्नातिकोपनः ।
चण्डशापप्रदोऽल्पेऽर्थे मुनिरागस्यसौम्यवाक् ॥ २ ॥
तस्याश्रमे मातरिश्वा न ववावतिनिष्ठुरं ।
नातितापं रविश्चक्रे पर्ज्जन्यो नातिकर्द्दमं ॥ ३ ॥
नातिशीतञ्च शीतांशुः परिपूर्णोऽपि रश्मिभिः ।
चकार भीत्या वै तस्य कोपनस्यातितेजसः ॥ ४ ॥
ऋतवश्च क्रमं त्यक्का वृक्षेष्वाश्रमजन्मसु ।
तस्या पुष्पफलञ्चक्रुराज्ञया सार्व्वकालिकं ॥ ५ ॥
ऊहुरापश्च छन्देन तस्याश्रमसमीपगाः ।
कमण्डलुगताश्चैव तस्य भीता महात्मनः ॥ ६ ॥
नातिक्लेशसहो विप्र सोऽभवत्कोपनो भृशं ।
अपुत्रश्च महाभागः स तपस्यकरोन्मनः ॥ ७ ॥
पुत्रकामो यताहारः शीतवातानलाहतः ।
तपस्यामि विचिन्त्येति तपस्येव मनो दधे ॥ ८ ॥
तस्येन्दुर्नातिशीताय नातितापाय भास्करः ।
अभवन्मातरिश्वा च ववौ नाति महामुने ॥ ९ ॥

आपीड्यमानो द्वन्द्वैश्च स भूतिर्मुनिसत्तमः ।
अनवाप्याभिलाषन्तं तपसः सन्न्यवर्त्तत ॥ १० ॥
तस्य भ्राता सुवर्च्चाऽभूद्यज्ञे तेनाभिमन्त्रितः ।
यियासुः शान्तिनामानं शिष्यमाह महामतिं ॥ ११ ॥
प्रशान्तमक्षप्रतिमं विनीतं गुरुकर्म्मणि ।
सदोद्युक्तं शुभाचारमुदारं मुनिसत्तमं ॥ १२ ॥

भूतिरुवाच ॥

अहं यज्ञं गमिष्यामि भ्रातुः शान्ते सुवर्च्चसः ।
तेनाहूतस्त्वया चेह यत्कर्त्तव्यं शृणुष्व तत् ॥ १३ ॥
प्रति जागरणं वह्नेस्त्वया कार्य्यं ममाश्रमे ।
तथा तथा प्रयत्नेन यथाग्निर्न शमं व्रजेत् ॥ १४ ॥

मार्कण्डेय उवाच ॥

इत्याज्ञाप्य तथेत्युक्तो गुरुः शिष्येन शान्तिना ।
जगाम यज्ञं तं भ्रातुराहूतः स यवीयसा ॥ १५ ॥
स च शान्तिर्व्वनाद्यावत्समित्पुष्पफलादिकं ।
उपानयति भक्त्यर्थं गुरोस्तस्य महात्मनः ॥ १६ ॥
अन्यच्च कुरुते कर्म्म गुरुभक्तिवशानुगः ।
प्रशान्तस्तावदनलो योऽसौ भूतिपरिग्रहः ॥ १७ ॥
तं दृष्ट्वा सोऽनलं शान्तं शान्तिरत्यन्तदुःखितः ।
भीतश्च भूतेर्व्बहुधा चिन्तामाप महामतिः ॥ १८ ॥
किं करोमि कथं वात्र अचिरागमनं गुरोः ।
मयाद्य प्रतिपत्तव्यं किं कृते सुकृतं भवेत् ॥ १९ ॥

प्रशान्ताग्निमिमं धिष्ण्यं यदि पश्यति मे गुरुः ।
ततो मां विषमे ह्यद्य व्यसने सन्नियोक्ष्यति ॥ २० ॥
यद्यन्यमग्निमत्राहमग्निस्थाने करोमि तत् ।
सर्व्वं प्रत्यक्षमेवास्य सोऽवश्यं मां करिष्यति ॥ २१ ॥
सोऽहं पापो गुरोस्तस्य निमित्तं कोपशापयोः ।
तथात्मानं न शोचामि यथा पापं कृतं गुरोः ॥ २२ ॥
दृष्ट्वा प्रशान्तमनलं नूनं शप्स्यति मां गुरुः ।
अथवा पावकः क्रुद्धस्तथावीर्य्यो हि स द्विजः ॥ २३ ॥
यस्य प्रभावाद्बिभ्यन्तो देवास्तिष्ठन्ति शासने ।
कृतागसं स मां युक्त्या कया नाधर्षयिष्यति ॥ २४ ॥

मार्कण्डेय उवाच ॥

बहुधैवं विचिन्त्यासौ भीतस्तस्य सदा गुरोः ।
ययौ मतिमतां श्रेष्ठः शरणं जातवेदसं ॥ २५ ॥
स चकार तदा स्तोत्रं समाकृष्यंतमानसः ।
स चैकचित्तो मेदिन्यां न्यस्तजानुः कृताञ्जलिः ॥ २६ ॥

शान्तिरुवाच ॥

ओँ नमः सर्व्वभूतानां साधनाय महात्मने ।
एकद्विपञ्चधिष्ण्याय राजसूये षडात्मने ॥ २७ ॥
नमः समस्तदेवानां वृत्तिदाय सुवर्च्चसे ।
शुक्ररूपाय जगतामशेषाणां स्थितिप्रदः ॥ २८ ॥
त्वं मुखं सर्व्वदेवानां त्वयात्तं भगवान् हविः ।
प्रीणयत्यखिलान्देवान् त्वत्प्राणाः सर्व्वदेवताः ॥ २९ ॥

हुतं हविस्त्वय्यमलमेघत्वमुपगच्छति ।
ततश्च जलरूपेण परिणाममुपैति यत् ॥ ३० ॥
तेनाखिलौषधीजन्म भवत्यनिलसारथे ।
ओषधीभिरशेषाभिः सुखं जीवन्ति जन्तवः ॥ ३१ ॥
वितन्वते नरा यज्ञान् त्वत्सृष्टास्वोषधीषु च ।
यज्ञैर्देवास्तथा दैत्यास्तद्वद्रक्षांसि पावक ॥ ३२ ॥
आप्याय्यन्ते च ते यज्ञास्त्वदाधारा हुताशन ।
अतः सर्व्वस्य योनिस्त्वं वह्ने सर्व्वमयस्तथा ॥ ३३ ॥
देवता दानवा यक्षा दैत्या गन्धर्व्वराक्षसाः ।
मानुषाः पशवो वृक्षा मृगपक्षिसरीसृपाः ॥ ३४ ॥
आप्याय्यन्ते त्वया सर्व्वे संवर्ध्यन्ते च पावक ।
त्वत्त एवोद्भवं यान्ति त्वय्यन्ते च तथा लयं ॥ ३५ ॥
अपः सृजसि देव त्वं त्वमत्सि पुनरेव ताः ।
पच्यमानास्त्वया ताश्च प्राणिनां पुष्टिकारणं ॥ ३६ ॥
देवेषु तेजोरूपेण कान्त्या सिद्धेष्ववस्थितः ।
विषरूपेण नागेषु वायुरूपः पतत्त्रिषु ॥ ३७ ॥
मनुजेषु भवान् क्रोधो मोहः पक्षिमृगादिषु ।
अवष्टम्भोऽसि तरुषु काठिन्यं त्वं महीं प्रति ॥ ३८ ॥
जले द्रवः त्वं भगवान् जवरूपी तथाऽनिले ।
व्यापित्वेन तथैवाग्ने नभस्यात्मा व्यवस्थितः ॥ ३९ ॥
त्वमग्ने सर्व्वभूतानामन्तश्चरसि पालयन् ।
त्वामेकमाहुः कवयस्त्वामाहुस्त्रिविधं पुनः ॥ ४० ॥

त्वामष्टधा कल्पयित्वा यज्ञमाद्यमकल्पयन् ।
त्वया सृष्टमिदं विश्वं वदन्ति परमर्षयः ॥ ४१ ॥
त्वामृते हि जगत्सर्व्वं सद्यो नश्येद्धुताशन ।
तुभ्यं कृत्वा द्विजः पूजां स्वकर्मविहितां गतिं ॥ ४२ ॥
प्रयाति हव्यकव्याद्यैः स्वधास्वाहाभ्युदीरणात् ।
परिणामात्मवीर्य्या हि प्राणिनाममरार्च्चित ॥ ४३ ॥
दहन्ति सर्व्वभूतानि ततो निष्क्राम्य हेतयः ।
जातवेदस्तवैवेयं विश्वसृष्टिर्महाद्युते ॥ ४४ ॥
तवैव वैदिकं कर्म्म सर्व्वभूतात्मकं जगत् ।
नमस्तेऽनल पिङ्गाक्ष नमस्तेऽस्तु हुताशन ॥ ४५ ॥
पावकाद्य नमस्तेऽस्तु नमस्ते हव्यवाहन ।
त्वमेव भुक्तपीतानां पाचनाद्विश्वपाचकः ॥ ४६ ॥
शस्यानां पाककर्त्ता त्वं पोष्टा त्वं जगतस्तथा ।
त्वमेव मेघस्त्वं वायुस्त्वं वीजं शस्यहेतुकं ॥ ४७ ॥
पोषाय सर्व्वभूतानां भूतभव्यभवो ह्यसि ।
त्वं ज्योतिः सर्व्वभूतेषु त्वमादित्यो विभावसुः ॥ ४८ ॥
त्वमहस्त्वं तथा रात्रिरुभे सन्ध्ये तथा भवान् ।
हिरण्यरेतास्त्वं वह्ने हिरण्योद्भवकारणं ॥ ४९ ॥
हिरण्यगर्भश्च भवान् हिरण्यसदृशप्रभः ।
त्वं मुहूर्त्तं क्षणश्च त्वं त्वं त्रुटिस्त्वं तथा लवः ॥ ५० ॥
कलाकाष्ठानिमेषादिरूपेणासि जगत्प्रभो ।
त्वमेतदखिलं कालः परिणामात्मको भवान् ॥ ५१ ॥

या जिह्वा भवतः काली कालनिष्ठाकरी प्रभो ।
भयान्नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥ ५२ ॥
कराली नाम या जिह्वा महाप्रलयकारणं ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥ ५३ ॥
मनोजवा च या जिह्वा लघिमा गुणलक्षणा ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥ ५४ ॥
करोति कामं भूतेभ्यो या ते जिह्वा सुलोहिता ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥ ५५ ॥
सधूम्रवर्णा या जिह्वा प्राणिनां रोगदायिका ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥ ५६ ॥
स्फुलिङ्गिनी च या जिह्वा यतः सकलपुद्गला ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥ ५७ ॥
या ते विश्वा सदा जिह्वा प्राणिनां शर्म्मदायिनी ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥ ५८ ॥
पिङ्गाक्ष लोहितग्रीव कृष्णवर्ण हुताशन ।
त्राहि मां सर्व्वदोषेभ्यः संसारादुद्धरेह मां ॥ ५९ ॥
प्रसीद वह्ने सप्तार्च्चिः कृशानो हव्यवाहन ।
अग्निपावकशुक्रादिनामाष्टभिरुदीरितः ॥ ६० ॥
अग्नेऽग्रे सर्व्वभूतानां समुद्भूत विभावसो ।
प्रसीद हव्यवाहाख्य अभिष्टुत मयाव्यय ॥ ६१ ॥

त्वमक्षयो वह्निरचिन्त्यरूपः
समृद्धिमान् दुष्प्रसहोऽतितीव्रः ।

त्वमव्ययं भीममशेषलोकं
समूर्त्तको हन्त्यथवातिवीर्य्यः ॥ ६२ ॥
त्वमुत्तमं सत्त्वमशेषसत्त्व-
हृत्पुण्डरीकस्त्वमनन्तमीड्यं ।
त्वया ततं विश्वमिदं चराचरं
हुताशनैको बहुधा त्वमत्र ॥ ६३ ॥
त्वमक्षयः सगिरिवना वसुन्धरा
नभः ससोमार्कमहर्द्दिवाखिलं ।
महोदधेर्जठरगतश्च बाडवो
भवान् विभूत्या परया करे स्थितः ॥ ६४ ॥
हुताशनस्त्वमिति सदाभिपूज्यसे
महाक्रतौ नियमपरैर्म्महर्षिभिः ।
अभिष्टुतः पिवसि च सोममध्वरे
वषट्कृतान्यपि च हवींषि भूतये ॥ ६५ ॥
त्वं विप्रैः सततमिहेज्यसे फलार्थं
वेदाङ्गेष्वथ सकलेषु गीयसे त्वं ।
त्वद्धेतोर्यजनपरायणा द्विजेन्द्रा
वेदाङ्गान्यधिगमयन्ति सर्व्वकाले ॥ ६६ ॥
त्वं ब्रह्मा यजनपरस्तथैव विष्णु-
र्भूतेशः सुरपतिरर्य्यमा जलेशः ।
सूर्य्येन्दू सकलसुरासुराश्च हव्यैः
सन्तोष्याभिमतफलान्यथाप्नुवन्ति ॥ ६७ ॥

अर्च्चिभिः परममहोपघातदुष्टं
संस्पृष्टं तव शुचि जायते समस्तं ।
स्नानानां परममतीव भस्मना सत्
सन्ध्यायां मुनिभिरतीव सेव्यसे तत् ॥ ६८ ॥
प्रसीद वह्ने शुचिनामधेय
प्रसीद वायो विमलातिदीप्ते ।
प्रसीद मे पावक वैद्युताद्य
प्रसीद हव्याशन पाहि मां त्वं ॥ ६९ ॥
यत्ते वह्ने शिवं रूपं ये च ते सप्त हेतयः ।
तैः पाहि नः स्तुतो देव पिता पुत्त्रमिवात्मजं ॥ ७० ॥

इति श्रीमार्कण्डेयपुराणे अग्निस्तोत्रं नाम ॥ ९९ ॥

शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवं स्तुतस्ततस्तेन भगवान् हव्यवाहनः ।
ज्वालामालावृतस्तत्त्र तस्यासीदग्रतो मुने ॥ १ ॥
देवो विभावसुः प्रीतस्तोत्रेणानेन वै द्विज ।
तं शान्तिमाह प्रणतं मेघगम्भीरवागथ ॥ २ ॥

अग्निरुवाच ॥

परितुष्टोऽस्मि ते विप्र भक्त्या या ते स्तुतिः कृता ।
वरं ददामि भवते प्रार्थ्यतां यत्तवेप्सितं ॥ ३ ॥

शान्तिरुवाच ॥

भगवन् कृतकृत्योऽस्मि यत्त्वां पश्यामि रूपिणं ।
तथापि भक्तिनम्रस्य भवता श्रूयतां मम ॥ ४ ॥
भ्रातृयज्ञं गतो देव ममाचार्य्यो निजाश्रमात् ।
आगतश्चाश्रमं धिष्ण्यं त्वत्सनाथं स पश्यतु ॥ ५ ॥
ममापराधात् सन्त्यक्तं धिष्ण्यं यत्ते विभावसो ।
तत्त्वयाधिष्ठितं सोऽद्य पूर्व्ववत् पश्यतां द्विजः ॥ ६ ॥
तथान्यदपि मे देव प्रसादं कुरुषे यदि ।
पुत्रो विशिष्टो भवतु तदपुत्रस्य मे गुरोः ॥ ७ ॥
यथा च मैत्रीं तनये स करिष्यति मे गुरुः ।
तथा समस्तसत्त्वेषु भवत्वस्य मनो मृदु ॥ ८ ॥
पश्यतां स्तोष्यते येन प्रीतिं यातोऽसि मेऽव्यय ।
स्तोत्रेण तस्य वरदो भवेथा मत्प्रसादितः ॥ ९ ॥

मार्कण्डेय उवाच ॥

एतत् श्रुत्वा वचस्तस्य तमाह द्विजसत्तमं ।
स्तोत्रेणाराधितो भूयो गुरुभक्त्या च पावकः ॥ १० ॥

अग्निरुवाच ॥

गुरोरर्थे यतो ब्रह्मन् याचितं ते वरद्वयं ।
नात्मार्थं तेन मे प्रीतिस्त्वय्यतीव महामुने ॥ ११ ॥
भविष्यत्येतदखिलं गुरोर्यत्प्रार्थितं त्वया ।
मैत्री समस्तभूतेषु पुत्रश्चास्य भविष्यति ॥ १२ ॥
मन्वन्तराधिपः पुत्रो भौत्यो नाम भविष्यति ।

महाबलो महावीर्य्यो महाप्राज्ञो गुरुस्तव ॥ १३ ॥
अनेन यश्च स्तोत्रेण स्तोष्यते मां समाहितः ।
तस्याभिलषितं सर्व्वं पुण्यञ्चास्य भविष्यति ॥ १४ ॥
यज्ञेषु पर्व्वकालेषु तीर्थेज्याहोमकर्म्मसु ।
धर्म्माय पठतामेतन्मम पुष्टिकरं परं ॥ १५ ॥
अहोरात्रकृतं पापं श्रुतमेतत् सकृत् द्विज ।
नाशयिष्यत्यसन्दिग्धं मम तुष्टिकरं परं ॥ १६ ॥
अहोमकालदोषादीन्नयोग्यैरपि तत्कृतैः ।
ये दोषास्तानिदं सद्यः शमयिष्यति संश्रुतं ॥ १७ ॥
पौर्णमास्याममावस्यां पर्व्वस्वन्येषु प्रस्तवः ।
ममैष संश्रुतो मर्त्त्यैर्भविता पापनाशनः ॥ १८ ॥

मार्कण्डेय उवाच ॥

इत्युक्ता भगवानग्निः पश्यतस्तस्य वै मुने ।
बभूवादर्शनः सद्यो दीपस्थो निर्वृतो यथा ॥ १९ ॥
स च शान्तिर्गते वह्नौ परितुष्टेन चेतसा ।
हर्षरोमाञ्चिततनुः प्रविवेशाश्रमं गुरोः ॥ २० ॥
जाज्वल्यमानं तत्रासौ गुरुधिष्ण्ये हुताशनं ।
ददर्श पूर्व्ववत्प्राप ततः स परमां मुदं ॥ २१ ॥
एतस्मिन्नन्तरे सोऽपि गुरुस्तस्य महात्मनः ।
भ्रातुर्यवीयसो यज्ञादाजगाम स्वमाश्रमं ॥ २२ ॥
तस्याग्रतश्च शिष्योऽसौ चक्रे पादाभिवन्दनं ।
गृहीतासनपूजश्च तमाह स तदा गुरुः ॥ २३ ॥

वत्सातिहार्द्दं त्वयि मे तथान्येषु च जन्तुषु ।
न वेद्मि किमिदं त्वञ्चेद्वत्सैतत्कथयाशु मे ॥ २४ ॥
ततः स शान्तिस्तत्सर्व्वमाचार्य्याय महामुने ।
अग्निनाशादिकं विप्रः समाचष्टे यथातथं ॥ २५ ॥
तच्छ्रुत्वा स परिष्वज्य स्नेहार्द्रनयनो गुरुः ।
शिष्याय प्रददौ वेदान् साङ्गोपाङ्गान् महामुने ॥ २६ ॥
भौत्यो नाम मनुस्तस्य पुत्त्रो भूतेरजायत ।
तस्य मन्वन्तरे देवान्रृषीन् भूपांश्च मे शृणु ॥ २७ ॥
भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात् ।
देवेन्द्रो यश्च भविता तस्य विख्यातकर्म्मणः ॥ २८ ॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भ्राजिरास्तथा ।
धारावृकाश्च इत्येते पञ्च देवगणाः स्मृताः ॥ २९ ॥
शुचिरिन्द्रस्तदा तेषां त्रिदशानां भविष्यति ।
महाबलो महावीर्य्यः सर्व्वैरिन्द्रगुणैर्युतः ॥ ३० ॥
अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥३१ ॥
गुरुर्गभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा ।
स्त्रीमानी च प्रतीरश्च विष्णुः संक्रन्दनस्तथा ॥ ३२ ॥
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ।
चतुर्द्दश मयैतत्ते मन्वन्तरमुदाहृतं ॥ ३३ ॥
श्रुत्वा मन्वन्तराणीत्थं क्रमेण मुनिसत्तम ।
पुण्यमाप्नोति मनुजस्तथा क्षीणाञ्च सन्ततिं ॥ ३४ ॥

श्रुत्वा मन्वन्तरं पूर्व्वं धर्ममाप्नोति मानवः ।
स्वारोचिषस्य श्रवणात् सर्व्वकामानवाप्नुते ॥ ३५ ॥
औत्तमे धनमाप्नोति ज्ञानञ्चाप्नोति तामसे ।
रैवते च श्रुते बुद्धिं सुरूपां विन्दते स्त्रियं ॥ ३६ ॥
आरोग्यञ्चाक्षुषे पुंसां श्रुते वैवस्वते बलं ।
गुणवत्पुत्रपौत्रन्तु सूर्य्यसावर्णिके श्रुते ॥ ३७ ॥
माहात्म्यं ब्रह्मसावर्णौ धर्मसावर्णिके शुभं ।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयं ॥ ३८ ॥
ज्ञातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते ।
निशातयत्यरिबलं रौच्यं श्रुत्वा नरोत्तम ॥ ३९ ॥
देवप्रसादमाप्नोति भौत्ये मन्वन्तरे श्रुते ।
तथाग्निहोत्रं पुत्रांश्च गुणयुक्तानवाप्नुते ॥ ४० ॥
सर्व्वाण्यनुक्रमाद्यश्च शृणोति मुनिसत्तम ।
मन्वन्तराणि तस्यापि श्रूयतां फलमुत्तमं ॥ ४१ ॥
तत्र देवानृषीनिन्द्रान्मनूंस्तत्तनयान्नृपान् ।
वंशांश्च श्रुत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते ॥ ४२ ॥
देवर्षीन्द्रन्नृपाश्चान्ये ये तन्मन्वन्तराधिपाः ।
ते प्रीयन्ते तथा प्रीताः प्रयच्छन्ति शुभां मतिं ॥ ४३ ॥
ततः शुभां मतिं प्राप्य कृत्वा कर्म्म तथा शुभं ।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्द्दश ॥ ४४ ॥
सर्व्वे स्युर्ऋतवः क्षेम्याः सर्व्वे सौम्यास्तथा ग्रहाः ।
भवन्त्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिं ॥ ४५ ॥

इति श्रीमार्कण्डेयपुराणे चतुर्दश मन्वन्तराणि समाप्तानि ॥ १०० ॥

## एकाधिकशततमोऽध्यायः ॥

कौष्टुकिरुवाच ॥

भगवन् कथिता सम्यक् त्वया मन्वन्तरस्थितिः ।
क्रमाद्विस्तरतस्त्वत्तो मया चैवावधारिता ॥ १ ॥
ब्रह्माद्यमखिलं वंशं भूभुजां द्विजसत्तम ।
श्रोतुं ममेच्छतः सम्यक् भगवन् प्रब्रवीहि मे ॥ २ ॥

मार्कण्डेय उवाच ॥

शृणु वत्स नृपाणां त्वमशेषाणां समुद्भवं ।
चरितञ्च जगन्मूलमादौ कृत्वा प्रजापतिं ॥ ३ ॥
अयं हि वंशो भूपालैरनेकक्रतुकर्तृभिः ।
संग्रामजिद्भिर्धर्म्मज्ञैः शतसंख्यैरलंकृतः ॥ ४ ॥
श्रुत्वा चैषां नरेन्द्राणां चरितानि महात्मनां ।
उत्पत्तयश्च पुरुषः सर्व्वपापैः प्रमुच्यते ॥ ५ ॥
मनुर्यत्र तथेक्ष्वाकू रणवन्तो भगीरथः ।
अन्ये च शतशो भूपाः सम्यक् पालितभूमयः ॥ ६ ॥
धर्मज्ञा यज्विनः शूराः सम्यक्परमवेदिनः ।
श्रुते तस्मिन् पुमान् वंशे पापौघाद्विप्रमुच्यते ॥ ७ ॥
तदयं श्रूयतां वंशो यतो वंशाः सहस्रशः ।
भिद्यन्ते मनुजेन्द्राणामवरोहा यथा वटात् ॥ ८ ॥

ब्रह्मा प्रजापतिः पूर्व्वं सिसृक्षुर्व्विविधाः प्रजाः ।
अङ्गुष्ठाद्दक्षिणाद्दक्षमसृजद्द्विजसत्तम ॥ ९ ॥
वामाङ्गुष्ठाच्च तत्पत्नीं जगत्सूतिकरो विभुः ।
ससर्ज भगवान् ब्रह्मा जगतां कारणं परं ॥ १० ॥
अदितिस्तस्य दक्षस्य कन्याजायत शोभना ।
तस्याञ्च कश्यपो देवं मार्त्तण्डं समजीजनत् ॥ ११ ॥
ब्रह्म स्वरूपं जगतामशेषाणां वरप्रदं ।
आदिमध्यान्तभूतञ्च सर्गस्थित्यन्तकर्म्मसु ॥ १२ ॥
यतोऽखिलमिदं यस्मिन्नशेषञ्च स्थितं द्विज ।
यत्स्वरूपं जगच्चेदं सदेवासुरमानुषं ॥ १३ ॥
यः सर्व्वभूतः सर्व्वात्मा परमात्मा सनातनः ॥
अदित्यामभवद्भास्वान् पूर्व्वमाराधितस्तया ॥ १४ ॥

क्रौष्टुकिरुवाच ॥

भगवन् श्रोतुमिच्छामि यत्स्वरूपं विवस्वतः ।
यत्कारणञ्चादिदेवः सोऽभवत् कश्यपात्मजः ॥ १५ ॥
यथा चाराधितो देव्या सोऽदित्या कश्यपेन च ।
आराधितेन चोक्तं यत्तेन देवेन भास्वता ॥ १६ ॥
प्रभावञ्चावतीर्णस्य यथावन्मुनिसत्तम ।
भवता कथितं सम्यक् श्रोतुमिच्छाम्यशेषतः ॥ १७ ॥

मार्कण्डेय उवाच ॥

विस्पष्टा परमा विद्या ज्योतिर्भा शाश्वती स्फुटा ।
कैवल्यं ज्ञानमाविर्भूः प्राकाम्यं संविदेव च ॥ १८ ॥

बोधश्चावगतिश्चैव स्मृतिर्विज्ञानमेव च ।
इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः ॥ १९ ॥
श्रूयताञ्च महाभाग विस्तराद्गदतो मम ।
यत्पृष्टवानसि रवेराविर्भावो यथाभवत् ॥ २० ॥
निष्प्रभेऽस्मिन्निरालोके सर्व्वतस्तमसावृते ।
बृहदण्डमभूदेकमक्षरं कारणं परं ॥ २१ ॥
तद्विभेद तदन्तःस्थो भगवान् प्रपितामहः ।
पद्मयोनिः स्वयं ब्रह्मा यः स्रष्टा जगतां प्रभुः ॥ २२ ॥
तन्मुखादोमिति महानभूच्छब्दो महामुने ।
ततो भूस्तु भुवस्तस्मात् ततश्च स्वरनन्तरं ॥ २३ ॥
एता व्याहृतयस्तिस्रः स्वरूपं तद्विवस्वतः ।
ओमित्यस्मात्स्वरूपात्तु सूक्ष्मरूपं रवेः परं ॥ २४ ॥
ततो महरितिस्थूलं जनं स्थूलतरं ततः ।
ततस्तपस्ततः सत्यमिति मूर्त्तानि सप्तधा ॥ २५ ॥
स्थितानि तस्य रूपाणि भवन्ति न भवन्ति च ।
स्वभावभावयोर्भावं यतो गच्छन्ति संशयं ॥ २६ ॥
आद्यन्तं यत्परं सूक्ष्ममरूपं परमं स्थितं ।
ओमित्युक्तं मया विप्र तत्परं ब्रह्म तद्वपुः ॥ २७ ॥

इति श्रीमार्कण्डेयपुराणे वंशानुकीर्त्तनं नाम ॥ १०१ ॥

## द्व्यधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

तस्मादण्डाद्विभिन्नात्तु ब्रह्मणोऽव्यक्तजन्मनः ।
ऋचो बभूवुः प्रथमं प्रथमाद्वदनान्मुने ॥ १ ॥
जवापुष्पनिभाः सद्यस्तेजोरूपान्तसंहताः ।
पृथक् पृथग्विभिन्नाश्च रजोरूपवहास्ततः ॥ २ ॥
यजूंषि दक्षिणाद्वक्त्रादनिरुद्धानि काञ्चनं ।
यादृग्वर्णन्तथावर्णान्यसंहतिधराणि च ॥ ३ ॥
पश्चिमं यद्विभोर्वक्त्रं ब्रह्मणः परमेष्ठिनः ।
आविर्भूतानि सामानि ततश्छन्दांसि तान्यथ ॥ ४ ॥
अथर्व्वाणमशेषञ्च भृङ्गाञ्जनचयप्रभं ।
यावद्धोरस्वरूपन्तदाभिचारिकशान्तिकं ॥ ५ ॥
उत्तरात् प्रकटीभूतं वदनात्तस्य वेधसः ।
सुखसत्त्वतमःप्रायं सौम्यासौम्यस्वरूपवत् ॥ ६ ॥
ऋचो रजोगुणाः सत्त्वं यजुषाञ्च गुणा मुने ।
तमोगुणानि सामानि तमःसत्त्वमथर्व्वसु ॥ ७ ॥
एतानि ज्वलमानानि तेजसाऽप्रतिमेन वै ।
पृथक् पृथगवस्थानं भाञ्जि पूर्व्वमिवाभवन् ॥ ८ ॥
ततस्तदाद्यं यत्तेज ओमित्युक्ताभिशब्द्यते ।
तस्य स्वभावाद्यत्तेजस्तत्समावृत्य संस्थितं ॥ ९ ॥

यथा यजुर्मयस्तेजस्तद्वत्साम्नां महामुने ।
एकत्वमुपयातानि परे तेजसि संश्रये ॥ १० ॥
शान्तिकं पौष्टिकञ्चैव तथा चैवाभिचारिकं ।
ऋगादिषु त्रयं ब्रह्मन् त्रितयं त्रिष्वथागमत् ॥ ११ ॥
ततो विश्वमिदं सद्यस्तमोनाशात् सुनिर्म्मलं ।
विभावनीयं विप्रर्षे तिर्य्यगूर्द्ध्वमधस्तथा ॥ १२ ॥
ततस्तन्मण्डलीभूतं छान्दसं तेज उत्तमं ।
परेण तेजसा ब्रह्मन्नेकत्वमुपयाति तत् ॥ १३ ॥
आदित्यसंज्ञामगमदादावेव यतोऽभवत् ।
विश्वस्यास्य महाभाग कारणञ्चाव्ययात्मकं ॥ १४ ॥
प्रातर्म्मध्यन्दिने चैव तथा चैवापराह्लिके ।
त्रयी तपति सा काले ऋग्यजुःसामसंज्ञिता ॥ १५ ॥
ऋचस्तपन्ति पूर्व्वाह्ले मध्याह्ने च यजूंषि वै ॥
सामानि चापराह्ले वै तपन्ति मुनिसत्तम ॥ १६ ॥
शान्तिकं ऋक्षु पूर्व्वाह्ले यजुःष्वन्तरपौष्टिकं ॥
विन्यस्तं साम्नि सायाह्ने आभिचारिकमन्ततः ॥ १७ ॥
मध्यन्दिनेऽपराह्ले च समे चैवाभिचारिकं ।
अपराह्ले पितॄणान्तु साम्ना कार्य्याणि तानि वै ॥ १८ ॥
विसृष्टौ ऋङ्मयो ब्रह्मा स्थितो विष्णुर्यजुर्म्मयः ।
रुद्रः साममयोऽन्ते च तस्मात्तस्याशुचिर्ध्वनिः ॥ १९ ॥
तदेवं भगवान् भास्वान् वेदात्मा वेदसंस्थितः ।
वेदविद्यात्मकश्चैव परः पुरुष उच्यते ॥ २० ॥

सर्गस्थित्यन्तहेतुश्च रजःसत्त्वादिकान् गुणान् ।
आश्रित्य ब्रह्मविष्ण्वादिसंज्ञामभ्येति शाश्वतः ॥ २१ ॥
देवैः सदेड्यः स तु वेदमूर्त्ति-
रमूर्त्तिराद्योऽखिलमर्त्यमूर्त्तिः ।
विश्वाश्रयं ज्योतिरवेद्यधर्म्मा
वेदान्तगम्यः परमः परेभ्यः ॥ २२ ॥

इति श्रीमार्कण्डेयपुराणे मार्त्तण्डमाहात्म्ये ॥ १०२ ॥

## त्र्यधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

तस्य सन्ताप्यमाने तु तेजसोर्द्ध्वमधस्तथा ।
सिसृक्षुश्चिन्तयामास पद्मयोनिः पितामहः ॥ १ ॥
सृष्टिः कृतापि मे नाशं प्रयास्यत्यभितेजसः ।
भास्वतः सृष्टिसंहारस्थितिहेतोर्महात्मनः ॥ २ ॥
अप्राणाः प्राणिनः सर्व्वे आपः शुष्यन्ति तेजसा ।
न चाम्भसा विना सृष्टिर्व्विश्वस्यास्य भविष्यति ॥ ३ ॥
इति सञ्चिन्त्य भगवान् स्तोत्रं भगवतो रवेः ।
चकार तन्मयो भूत्वा ब्रह्मा लोकपितामहः ॥ ४ ॥

ब्रह्मोवाच ॥

नमस्ये यन्मयं सर्व्वमेतत्सर्व्वमयश्च यः ।
विश्वमूर्त्तिः परं ज्योतिर्यत्तद्ध्यायन्ति योगिनः ॥ ५ ॥

य ऋङ्मयो यो यजुषान्निधानं
साम्नाञ्च यो योनिरचिन्त्यशक्तिः ।
त्रयीमयी स्थूलतयार्द्धमात्रा
परस्वरूपो गुणपारयोग्यः ॥ ६ ॥

तं सर्व्वहेतुं परमेष्ठ्यवेद्य-
मादौ परज्योतिरवह्निरूपं ।
स्थूलञ्च देवात्मतया नमस्ये
भास्वन्तमाद्यं परमं परेभ्यः ॥ ७ ॥

सृष्टिङ्करोमि यदहं तव शक्तिराद्या
तत्प्रेरितो जलमहीपवनाग्निरूपां ।
तद्देवतादिविषयां प्रणवाद्यशेषां
नात्मेच्छया स्थितिलयावपि तद्वदेव ॥ ८ ॥

वह्निस्त्वमेव जलशोषणतः पृथिव्याः
सृष्टिङ्करोमि जगताञ्च तथाद्यपाकं ।
व्यापी त्वमेव भगवन् गगनस्वरूपं
त्वं पञ्चधा जगदिदं परिपासि विश्वं ॥ ९ ॥

यज्ञैर्यजन्ति परमात्मविदो भवन्तं
विष्णुस्वरूपमखिलेष्टिमयं विवस्वन् ।
ध्यायन्ति चापि यतयो नियतात्मचित्ताः
सर्व्वेश्वरं परममात्मविमुक्तिकामाः ॥ १० ॥

नमस्ते देवरूपाय यज्ञरूपाय ते नमः ।
परब्रह्मस्वरूपाय चिन्त्यमानाय योगिभिः ॥ ११ ॥

उपसंहर तेजोयत्तेजसः संहतिस्तव ।
सृष्टेर्विघाताय विभो सृष्टौचाहं समुद्यतः ॥ १२ ॥

मार्कण्डेय उवाच ॥

इत्येवं संस्तुतो भास्वान् ब्रह्मणा सर्गकर्तृणा ।
उपसंहृतवांस्तेजः परं स्वल्पमधारयत् ॥ १३ ॥
चकार च ततः सृष्टिं जगतः पद्मसम्भवः ।
तथा तेषु महाभागः पूर्व्वकल्पान्तरेषु वै ॥ १४ ॥
देवासुरादीन् मर्त्त्यांश्च पश्वादीन् वृक्षवीरुधः ।
ससर्ज्ज पूर्व्ववद्ब्रह्मा नरकांश्च महामुने ॥ १५ ॥

इति श्रीमार्कण्डेयपुराणे आदित्यस्तवो नाम ॥ १०३ ॥

## चतुरधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

सृष्ट्वा जगदिदं ब्रह्मा प्रविभागमथाकरोत् ।
वर्णाश्रमसमुद्राद्रिद्वीपानां पूर्व्ववद्यथा ॥ १ ॥
देवदैत्योरगादीनां रूपस्थानानि पूर्व्ववत् ।
देवेभ्य एव भगवानकरोत् कमलोद्भवः ॥ २ ॥
ब्रह्मणस्तनयो योऽभून्मरीचिरिति विश्रुतः ।
कश्यपस्तस्य पुत्त्रोऽभूत् काश्यपो नाम नामतः ॥ ३ ॥

दक्षस्य तनया ब्रह्मन् तस्य भार्य्यास्त्रयोदश ।
बहवस्तत्सुताश्चासन् देवदैत्योरगादयः ॥ ४ ॥
अदितिर्जनयामास देवांस्त्रिभुवनेश्वरान् ।
दैत्यान् दितिर्दनुश्चोग्रान् दानवानुरुविक्रमान् ॥ ५ ॥
गरुडारुणौ च विनता यक्षरक्षांसि वै खसा ।
कद्रुः सुपाव नागांश्च गन्धर्व्वान् सुषुवे मुनिः ॥ ६ ॥
क्रोधाया जज्ञिरे कुल्या रिष्टायाश्चाप्सरोगणाः ।
ऐरावतादीन्मातङ्गानिरा च सुषुवे द्विज ॥ ७ ॥
ताम्रा च सुषुवे श्येनीप्रमुखाः कन्यका द्विज ।
यासां प्रसूताः खगमाः श्येनभासशुकादयः ॥ ८ ॥
इलायाः पादपा जाताः प्रधायास्पतसां गणाः ।
अदित्यां या समुत्पन्ना कश्यपस्येति सन्ततिः ॥ ९ ॥
तस्याश्च पुत्रदौहित्रैः पौत्रदौहित्रिकादिभिः ।
व्याप्तमेतज्जगत् सूत्या तेषां तासाञ्च वै मुने ॥ १० ॥
तेषां कश्यपपुत्राणां प्रधाना देवतागणाः ।
सात्त्विका राजसास्त्वेते तामसाश्च मुने गणाः ॥ ११ ॥
देवान् यज्ञभुजश्चक्रे तथा त्रिभुवनेश्वरान् ।
ब्रह्मा ब्रह्मविदां श्रेष्ठः परमेष्ठी प्रजापतिः ॥ १२ ॥
तानबाधन्त सहिताः सपत्ना दैत्यदानवाः ।
राक्षसाश्च तथा युद्धं तेषामासीत् सुदारुणं १३ ॥
दिव्यं वर्षसहस्रन्तु पराजीयन्त देवताः ।
जयिनश्चाभवन् विप्र बलिनो दैत्यदानवाः ॥ १४ ॥

ततो निराकृतान् पुत्रान् दैतेयैर्दानवैस्तथा ।
हृतत्रिभुवनान् दृष्ट्वा अदितिर्मुनिसत्तम ॥ १५ ॥
आच्छिन्नयज्ञभागांश्च शुचा संपीडिता भृशं ।
आराधनाय सवितुः परं यत्नं प्रचक्रमे ॥ १६ ॥
एकाग्रा नियताहारा परं नियममास्थिता ।
तुष्टाव तेजसां राशिं गगनस्थं दिवाकरं ॥ १७ ॥

अदितिरुवाच ॥

नमस्तुभ्यं परां सूक्ष्मां सौवर्णीं बिभ्रते तनुं ।
धाम धामवतामीश धाम्नामाधार शाश्वत ॥ १८ ॥
जगतामुपकाराय त्वामापस्तव गोपते ।
आददानस्य यद्रूपं तीव्रं तस्मै नमाम्यहं ॥ १९ ॥
ग्रहीतुमष्टमासेन कालेनेन्दुमयं रसं ।
बिभ्रतस्तव यद्रूपमतितीव्रं नतास्मि तत् ॥ २० ॥
तमेव मुञ्चतः सर्व्वं रसं वै वर्षणाय यत् ।
रूपमाप्यायकं भास्वंस्तस्मै मेघाय ते नमः ॥ २१ ॥
वार्य्युत्सर्गविनिष्पन्नमशेषञ्चौषधीगणं ।
पाकाय तव यद्रूपं भास्करं तं नमाम्यहं ॥ २२ ॥
यच्च रूपं तवातीव हिमोत्सर्गादिशीतलं ।
तत्कालसस्यपोषाय तरणे तस्य ते नमः ॥ २३ ॥
नातितीव्रं च यद्रूपं नातिशीतञ्च यत्तव ।
वसन्तर्त्तौ रवे सौम्यं तस्मै देव नमो नमः ॥ २४ ॥
आप्यायनमशेषाणां देवानाञ्च तथा परं ।

पितृणाञ्च नमस्तस्मै शस्यानां पाकहेतवे ॥ २५ ॥
यद्रूपं जीवनायैकं वीरुधाममृतात्मकं ।
पीयते देवपितृभिस्तस्मै सोमात्मने नमः ॥ २६ ॥
आभ्यां यदर्करूपाभ्यां रूपं विश्वमयन्तव ।
समेतमग्नीषोमाभ्यां नमस्तस्मै गुणात्मने ॥ २७ ॥
यद्रूपं ऋग्यजुःसाम्नामैक्येन तपते तव ।
विश्वमेतत्त्रयीसंज्ञं नमस्तस्मै विभावसो ॥ २८ ॥
यत्तु तस्मात्परं रूपं ओमित्युक्ताभिशब्दितं ।
अस्थूलानन्तममलं नमस्तस्मै सदात्मने ॥ २९ ॥

मार्कण्डेय उवाच ॥

एवं सा नियता देवी चक्रे स्तोत्रमहर्निशं ।
निराहारा विवस्वन्तमारिराधयिषुर्मुने ॥ ३० ॥
ततः कालेन महता भगवांस्तपनोऽम्बरे ।
प्रत्यक्षतामगादस्या दाक्षायण्या द्विजोत्तम ॥ ३१ ॥
सा ददर्श महाकूटं तेजसोऽम्बरसंश्रितं ।
भूमौ च संस्थितं भास्वत् ज्वालामालातिदुर्दृशं ॥ ३२ ॥
तं दृष्ट्वा सा तदा देवी साध्वसं परमङ्गता ।
जगाद मे प्रसीदेति न त्वां पश्यामि गोपते ॥ ३३ ॥
यथा दृष्टवती पूर्वमम्बरस्थं सुदुर्दृशं ।
निराहारा विवस्वन्तं तपन्तं तदनन्तरं ॥ ३४ ॥
संघातं तेजसां तद्वदिह पश्यामि भूतले ।
प्रसादं कुरु पश्येयं यद्रूपन्ते दिवाकर ॥

भक्तानुकम्पक विभो भक्तोऽहं पाहि मे सुतान् ॥ ३५ ॥
त्वं धाता विसृजसि विश्वमेतत्
त्वं पासि स्थितिकरणाय संप्रवृत्तः ।
त्वय्यन्ते लयमखिलं प्रयाति तत्त्वं
त्वत्तोऽन्या न हि गतिरस्ति सर्वलोके ॥ ३६ ॥
त्वं ब्रह्मा हरिरजसंज्ञितस्त्वमिन्द्रो
वित्तेशः पितृपतिरम्बुपतिः समीरः ।
सोमोऽग्निर्गगनमहीधरोऽब्धिः
किं स्तव्यं तव सकलात्मरूप धाम्नः ॥ ३७ ॥
यज्ञेश त्वामनुदिनमात्मकर्मसक्ताः
स्तुवन्तो विविधपदैर्द्विजा यजन्ति ।
ध्यायन्तो विनियतचेतसो भवन्तं
योगस्थाः परमपदं प्रयान्ति योगमूर्त्या ॥ ३८ ॥
तपसि पचसि विश्वं पासि भस्मीकरोषि
प्रकटयसि मयूखैर्ह्लादयस्यम्बुगर्भैः ।
सृजसि पुनरपि त्वं भावनास्वच्युतासु
प्रणमितसरमर्त्यैः पापकृद्भिस्त्वगम्यः ॥ ३९ ॥

इति श्रीमार्कण्डेयपुराणे दिवाकरस्तुतिर्नाम ॥ १०८ ॥

पञ्चाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततः स्वतेजसस्तस्मादाविर्भूतो विभावसुः ।
अदृश्यत तदादित्यस्तप्तताम्रोपमः प्रभुः ॥ १ ॥
अथ तां प्रणतां देवीं तस्य सन्दर्शनान्मुने ।
प्राह भास्वान् वृणुष्वेष्टं वरं मत्तो यमिच्छसि ॥ २ ॥
प्रणता शिरसा सा च जानुपीडितमेदिनी ।
प्रत्युवाच विवस्वन्तं वरदं समुपस्थितं ॥ ३ ॥
देव प्रसीद पुत्राणां हृतं त्रिभुवनं मम ।
यज्ञभागाश्च दैत्यैश्च दानवैश्च बलाधिकैः ॥ ४ ॥
तन्निमित्तप्रसादं त्वं कुरुष्व मम गोपते ।
अंशेन तेषां भ्रातृत्वं गत्वा नाशय तद्रिपून् ॥ ५ ॥
यथा मे तनया भूयो यज्ञभागभुजः प्रभो ।
भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर ॥ ६ ॥
तथानुकम्पा पुत्राणां सुप्रसन्नो रवे मम ।
कुरु प्रपन्नार्त्तिहर स्थितिकर्त्ता त्वमुच्यते ॥ ७ ॥

मार्कण्डेय उवाच ॥

ततस्तामाह भगवान् भास्करो वारितस्करः ।
प्रणतामदितिं विप्र प्रसादं सुमुखो विभुः ॥ ८ ॥
सहस्रांशेन ते गर्भे सम्भूयाहमशेषतः ।
त्वत्पुत्रशत्रूनदिते नाशयाम्याशु निर्वृता: ॥ ९ ॥

इत्युक्त्वा भगवान् भास्वानन्तर्द्धानमुपागमत् ।
निवृत्ता सापि तपसः संप्राप्ताखिलवाञ्छिता ॥ १० ॥
ततो रश्मिसहस्रन्तु सौसुम्नाख्यो रवेः करः ।
विप्रावतारं संचक्रे देवमातुरथोदरे ॥ ११ ॥
कृच्छ्रचान्द्रायणादीनि सा च चक्रे समाहिता ।
शुचिनी धारयामास दिव्यं गर्भमिति द्विज ॥ १२ ॥
ततस्तां कश्यपः प्राह किञ्चित्कोपप्लुताक्षरं ।
किम्मारयसि गर्भाण्डमिति नित्योपवासिनी ॥ १३ ॥
सा च तं प्राह गर्भाण्डमेतत्पश्यसि कोपन ।
न मारितं विपक्षाणां मृत्यवे तद्भविष्यति ॥ १४ ॥

मार्कण्डेय उवाच ॥

इत्युक्त्वा तं तदा गर्भमुत्ससर्ज्ज सुरावनिः ।
जाज्वल्यमानन्तेजोभिः पत्युर्व्वचनकोपिता ॥ १५ ॥
तं दृष्ट्वा कश्यपो गर्भमुद्यद्भास्करवर्च्चसं ।
तुष्टाव प्रणतो भूत्वा ऋग्भिराद्याभिरादरात् ॥ १६ ॥
संस्तूयमानः स तदा गर्भाण्डात्प्रकटोऽभवत् ।
पद्मपत्रसवर्णाभस्तेजसा व्याप्तदिङ्मुखः ॥ १७ ॥
अथान्तरीक्षादाभाष्य कश्यपं मुनिसत्तमं ।
सतोयमेघगम्भीरवागुवाचाशरिरिणी ॥ १८ ॥
मारितं ते यतः प्रोक्तमेतदण्डं त्वया मुने ।
तस्मान्मुने सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ॥ १९ ॥
सूर्य्याधिकारञ्च विभुर्जगत्येष करिष्यति ।

हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् ॥ २० ॥
देवा निशम्येति वचो गगनात्समुपागमन् ।
प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥ २१ ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ।
सह देवैर्मुदा युक्ता दानवाश्च समभ्ययुः ॥ २२ ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
शस्त्रास्त्रदीप्तिसंदीप्तं समस्तभुवनान्तरं ॥ २३ ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिताः ।
तेजसा दह्यमानास्ते भस्मीभूता महासुराः ॥ २४ ॥
ततः प्रहर्षमतुलं प्राप्ताः सर्व्वे दिवौकसः ।
तुष्टुवुस्तेजसां योनिं मार्त्तण्डमदितिन्तथा ॥ २५ ॥
स्वाधिकारांस्तथा प्राप्ता यज्ञभागांश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्डः स्वाधिकारमथाकरोत् ॥ २६ ॥
कदम्बपुष्पवद्भास्वानधश्चोर्द्ध्वञ्च रश्मिभिः ।
वृत्ताग्निपिण्डसदृशो दध्रे नातिस्फुरद्वपुः ॥ २७ ॥

इति श्रीमार्कण्डेयपुराणे मार्त्तण्डोत्पत्तिर्नाम ॥ १०५ ॥

---

## षडधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

अथ तस्मै ददौ कन्यां संज्ञां नाम विवस्वते ।
प्रसाद्य प्रणतो भूत्वा विश्वकर्मा प्रजापतिः ॥ १ ॥

वैवस्वतस्तु सम्भूतो मनुस्तस्यां विवस्वतः ।
पूर्व्वमेव तथा ख्यातं तत्स्वरूपं विशेषतः ॥ २ ॥
त्रीण्यपत्यान्यसौ तस्यां जनयामास गोपतिः ।
द्वौ पुत्रौ सुमहाभागौ कन्याञ्च यमुनां मुने ॥ ३ ॥
मनुर्व्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः ।
ततो यमो यमी चैव यमलौ संबभूवतुः ॥ ४ ॥
यत्तेजोऽभ्यधिकन्तस्य मार्त्तण्डस्य विवस्वतः ।
तेनातितापयामास त्रीँल्लोकान् सचराचरान् ॥ ५ ॥
गोलाकारन्तु तं दृष्ट्वा संज्ञा रूपं विवस्वतः ।
असहन्ती महत्तेजः स्वच्छायां प्रेक्ष्य साऽब्रवीत् ॥ ६ ॥

संज्ञोवाच ॥

अहं यास्यामि भद्रन्ते स्वमेव भवनं पितुः ।
निर्व्विकारं त्वयाप्यत्र स्थेयं मच्छासनाच्छुभे ॥ ७ ॥
इमौ च बालकौ मह्यं कन्या च वरवर्णिनी ।
सम्भाव्यौ नैव चाख्येयमिदम्भगवते त्वया ॥ ८ ॥

छायोवाच ॥

आकेशग्रहणाद्देवि आशापान्नैव कर्हिचित् ।
आख्यास्यामि मतं तुभ्यं गम्यतां यत्र वाञ्छितं ॥ ९ ॥
इत्युक्ता छायया संज्ञा जगाम पितृमन्दिरं ।
तत्रावसत् पितुर्गेहे कञ्चित्कालं शुभेक्षणा ॥ १० ॥
भर्त्तुः समीपं याहीति पित्रोक्ता सा पुनः पुनः ।
अगच्छद्वडवा भूत्वा कुरून् विप्रोत्तरांस्ततः ॥ ११ ॥

तत्र तेपे तपः साध्वी निराहारा महामुने ।
पितुः समीपं यातायाः संज्ञाया वाक्यतत्परा ॥ १२ ॥
तद्रूपधारिणी छाया भास्करं समुपस्थिता ।
तस्याञ्च भगवान् सूर्य्यः संज्ञायामिति चिन्तयन् ॥ १३ ॥
तथैव जनयामास द्वौ सुतौ कन्यकां तथा ।
पूर्व्वजस्य मनोस्तुल्यः सावर्णिस्तेन सोऽभवत् ॥ १४ ॥
यस्तयोः प्रथमं जातः पुत्रयोर्द्विजसत्तम ।
द्वितीयो योऽभवच्चान्यः स ग्रहोऽभूच्छनैश्चरः ॥ १५ ॥
कन्याभूत्तपती या तां वव्रे सम्वरणो नृपः ।
संज्ञा तु पार्थिवी तेषामात्मजानां यथाऽकरोत् ॥ १६ ॥
स्नेहान्न पूर्व्वजातानां तथा कृतवती सती ।
मनुस्तत्क्षान्तवांस्तस्या यमश्चास्या न चक्षमे ॥ १७ ॥
वहुशो याच्यमानस्तु पितुः पत्न्या सुदुःखितः ।
स वै कोपाच्च बाल्याच्च भाविनोऽर्थस्य वै बलात् ॥ १८ ॥
पदा सन्तर्जयामास छायासंज्ञां यमो मुने ।
ततः शशाप च यमं संज्ञा सामर्षिणी भृशं ॥ १९ ॥

छायोवाच ॥

पदा तर्ज्जयसे यस्मात् पितृभार्य्यां गरीयसीं ।
तस्मात्तवैव चरणः पतिष्यति नसंशयः ॥ २० ॥
यमस्तु तेन शापेन भृशं पीडितमानसः ।
मनुना सह धर्म्मात्मा सर्व्वं पित्रे न्यवेदयत् ॥ २१ ॥

यम उवाच ॥

स्नेहेन तुल्यमस्मासु माता देव न वर्त्तते ।
विसृज्य ज्यायसोऽप्यस्मान् कनीयांसौ बुभूषति ॥ २२ ॥
तस्यां मयोद्यतः पादो न तु देहे निपातितः ।
बाल्याद्वा यदि वा मोहात्तद्भवान् क्षन्तुमर्हति ॥ २३ ॥
शप्तोऽहं तात कोपेन जनन्या तनयो यतः ।
ततो नमस्ये जननीं इमां वै तपतां वर ॥ २४ ॥
विगुणेष्वपि पुत्रेषु न माता विगुणा पितः ।
पादस्ते पततां पुत्र कथमेतत्प्रवक्ष्यति ॥ २५ ॥
तव प्रसादाच्चरणो न पतेद्भगवान् यथा ।
मातृशापादयं मेऽद्य तथा चिन्तय गोपते ॥ २६ ॥

रविरुवाच ॥

असंशयमिदं पुत्र भविष्यत्यत्र कारणं ।
येन त्वामाविशत्क्रोधो धर्मज्ञं सत्यवादिनं ॥ २७ ॥
सर्व्वेषामेव शापानां प्रतिघातो हि विद्यते ।
न तु मात्राभिशप्तानां क्वचिच्छापनिवर्त्तनं ॥ २८ ॥
न शक्यमेतन्मिथ्या तु कर्त्तुं मातुर्व्वचस्तव ।
किञ्चित्तव विधास्यामि पुत्रस्नेहादनुग्रहं ॥ २९ ॥
कृमयो मांसमादाय प्रयास्यन्ति महीतलं ।
कृतं तस्या वचः सत्यं त्वञ्च त्रातो भविष्यसि ॥ ३० ॥

मार्कण्डेय उवाच ॥

आदित्यस्त्वब्रवीच्छायां किमर्थं तनयेषु वै ।

तुल्येष्वप्यधिकः स्नेह एकत्र क्रियते त्वया ॥ ३१ ॥
नूनं नैषां त्वं जननी संज्ञा कापि त्वमागता ।
विगुणेष्वप्यपत्येषु कथं माता शपेत्सुतं ॥ ३२ ॥

मार्कण्डेय उवाच ॥

सा तत्परिहरन्ती च नाचचक्षे विवस्वतः ।
स चात्मानं समाधाय मुक्तस्तत्त्वमपश्यत ॥ ३३ ॥
तं शप्तुमुद्यतं दृष्ट्वा छायासंज्ञा दिवस्पतिं ।
भयेन कम्पती ब्रह्मन् यथा वृत्तं न्यवेदयत् ॥ ३४ ॥
विवस्वांस्तु ततः क्रुद्धः श्रुत्वा श्वशुरमभ्यगात् ।
स चापि तं यथान्यायमर्च्चयित्वा दिवाकरं ॥
निर्दग्धुकामं रोषेण सान्त्वयामास सुव्रतः ॥ ३५ ॥

विश्वकर्म्मोवाच ॥

तवातितेजसा व्याप्तमिदं रूपं सुदुःसहं ।
असहन्ती ततः संज्ञा वने चरति वै तपः ॥ ३६ ॥
द्रक्ष्यते तां भवानद्य स्वभार्य्यां शुभचारिणीं ।
रूपार्थं भवतोऽरण्ये चरन्तीं सुमहत्तपः ॥ ३७ ॥
स्मृतं मे ब्रह्मणो वाक्यं यदि ते देव रोचते ।
रूपं निवर्त्तयाम्येतत् तव कान्तं दिवस्पते ॥ ३८ ॥

मार्कण्डेय उवाच ॥

यतो हि भास्वतो रूपं प्रागासीत्परिमण्डलं ।
ततस्तथेति तं प्राह त्वष्टारं भगवान् रविः ॥ ३९ ॥
विश्वकर्मा त्वनुज्ञातः शाकद्वीपे विवस्वतः ।

भ्रमिमारोप्य तत्तेजः शातनायोपचक्रमे ॥ ४० ॥
भ्रमताऽशेषजगतां नाभिभूतेन भास्वता ।
समुद्राद्रिवनोपेता सारुरोह मही नभः ॥ ४१ ॥
गगनञ्चाखिलं ब्रह्मन् सचन्द्रग्रहतारकं ।
अधो गतं महाभाग बभूवाक्षिप्तमाकुलं ॥ ४२ ॥
विक्षिप्तसलिलाः सर्व्वे बभूवुश्च तथार्ण्णवाः ।
व्यभिद्यन्त महाशैलाः शीर्णसानुनिबन्धनाः ॥ ४३ ॥
ध्रुवाधाराण्यशेषाणि धिष्ण्यानि मुनिसत्तम ।
त्रुट्यद्रश्मिनिबन्धानि अधो जग्मुः सहस्रशः ॥ ४४ ॥
वेगभ्रमणसंजातवायुक्षिप्ताः समन्ततः ।
व्यशीर्य्यन्त महामेघा घोररावविचारिणः ॥ ४५ ॥
भास्वद्भ्रमणविभ्रान्तं भूम्याकाशरसातलं ।
जगादाकुलमत्यर्थं तदासीन्मुनिसत्तम ॥ ४६ ॥
त्रैलोक्ये सकले विप्र भ्रममाणे सुरर्षयः ।
देवाश्च ब्रह्मणा सार्द्धं भास्वन्तमभितुष्टुवुः ॥ ४७ ॥
आदिदेवोऽसि देवानां ज्ञातमेतत्स्वरूपतः ।
सर्गस्थित्यन्तकालेषु त्रिधा भेदेन तिष्ठसि ॥ ४८ ॥
स्वस्ति तेऽस्तु जगन्नाथ घर्मवर्षाहिमाकर ।
जुषस्व शान्तिं लोकानां देवदेव दिवाकर ॥ ४९ ॥
इन्द्रश्चागत्य तं देवं लिख्यमानं यथाऽस्तुवत् ।
जय देव जगद्व्यापिन् जयाशेषजगत्पते ॥ ५० ॥
ऋषयश्च ततः सप्त वशिष्ठात्रिपुरोगमाः ।

तुष्टुवुर्व्विविधैः स्तोत्रैः स्वस्तिस्वस्तीतिवादिनः ॥ ५१ ॥
वेदोक्ताभिरथाग्र्याभिर्वालिखिल्याश्च तुष्टुवुः ।
ऋग्भिराद्याभिर्भास्वन्तं लिख्यमानं मुदा युताः ॥ ५२ ॥
त्वं नाथ मोक्षिणां मोक्षो ध्येयस्त्वं ध्यानिनां परः ।
त्वं गतिः सर्व्वभूतानां कर्मकाण्डेऽपि वर्त्ततां ॥ ५३ ॥
शं प्रजाभ्योऽस्तु देवेश शन्नोऽस्तु जगताम्पते ।
शन्नोऽस्तु द्विपदे नित्यं शन्नश्चास्तु चतुष्पदे ॥ ५४ ॥
ततो विद्याधरगणा यक्षराक्षसपन्नगाः ।
कृताञ्जलिपुटाः सर्व्वे शिरोभिः प्रणता रविं ॥ ५५ ॥
ऊचुरेवंविधा वाचो मनःश्रोत्रसुखावहाः ।
सह्यं भवतु ते तेजो भूतानां भूतभावन ॥ ५६ ॥
ततो हाहाहुहुश्चैव नारदस्तुम्बुरुस्तथा ।
उपगायितुमारब्धा गान्धर्व्वकुशला रविं ॥ ५७ ॥
षड्जमध्यमगान्धारग्रामत्रयविशारदाः ।
मूर्च्छनाभिश्च तालैश्च सम्प्रयोगैः सुखप्रदं ॥ ५८ ॥
विश्वाची च घृताची च उर्व्वश्यथ तिलोत्तमा ।
मेनका सहजन्या च रम्भाश्चाप्सरसां वराः ॥ ५९ ॥
ननृतुर्जगतामीशे लिख्यमाने विभावसौ ।
हावभावविलासाढ्यान् कुर्व्वन्तोऽभिनयान् बहून् ॥ ६० ॥
प्रावाद्यन्त ततस्तत्र वेणुवीणादिदर्दुराः ।
पणवाः पुष्कराश्चैव मृदङ्गाः पटहानकाः ॥ ६१ ॥
देवदुन्दुभयः शङ्खाः शतशोऽथ सहस्रशः ।

गायद्भिश्चैव गन्धर्वैर्नृत्यद्भिश्चाप्सरोगणैः ॥ ६२ ॥
तूर्य्यवादित्रघोषैश्च सर्वं कोलाहलीकृतं ।
ततः कृताञ्जलिपुटा भक्तिनम्रात्ममूर्त्तयः ॥ ६३ ॥
लिख्यमानं सहस्रांशुं प्रणेमुः सर्वदेवताः ।
ततः कोलाहले तस्मिन् सर्वदेवसमागमे ॥
तेजसः शातनञ्चक्रे विश्वकर्मा शनैः शनैः ॥ ६४ ॥

इति हिमजलघर्मकालहेतो-
र्हरकमलासनविष्णुसंस्तुतस्य ।
तनुपरिलिखनन्निशम्य भानो-
र्व्रजति दिवाकरलोकमायुषोऽन्ते ॥ ६५ ॥

इति श्रीमार्कण्डेयपुराणे भानुतनुलिखने ॥ १०६ ॥

सप्ताधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

लिख्यमाने ततो भानौ विश्वकर्मा प्रजापतिः ।
उद्भूतपुलकस्तोत्रमिदञ्चक्रे विवस्वतः ॥ १ ॥

विवस्वते प्रणतहितानुकम्पिने
महात्मने समजवसप्तसप्तये ।
सुतेजसे कमलकुलावबोधिने
नमस्तमःपटलपटावपाटिने ॥ २ ॥

पावनातिशयपुण्यकर्मणे
नैककामविषयप्रदायिने ।
भास्वरानलमयूखशायिने
सर्व्वलोकहितकारिणे नमः ॥ ३ ॥
अजाय लोकत्रयकारणाय
भूतात्मने गोपतये वृषाय ।
नमो महाकारुणिकोत्तमाय
सूर्य्याय चक्षुःप्रभवालयाय ॥ ४ ॥
विवस्वते ज्ञानभूतान्तरात्मने
जगत्प्रतिष्ठाय जगद्धितैषिणे ।
स्वयम्भुवे लोकसमस्तचक्षुषे
सुरोत्तमायामिततेजसे नमः ॥ ५ ॥
क्षणमुदयाचलमौलिमालिने
सुरगणमहितहितो जगतः ।
त्वमुरुमयूखसहस्रवपु-
र्जगति विभासि तमांसि नुदन् ॥ ६ ॥
भव तिमिरासवपानमदात्
भवति विलोहितविग्रहात् ।
मिहिर विभासि यतः सुतरां
त्रिभुवनभावनभानिकरैः ॥ ७ ॥
रथमधिरुह्य समावयवं
चारु विकम्पितमुरुरुचिरं ।

सततमखिलहयैर्भगवन्
चरसि जगद्धिताय विततं ॥ ८ ॥
अमृतसुधांशुरसेन समं
विबुध पितॄनपि तर्पयसे ।
अरिगणसूदन तेन तव
प्रणिपत्य लिखामि जगद्धिताय ॥ ९ ॥
शुकसमवर्णहयप्रथितं
तव पदपांशुपवित्रतलं ।
नतजनवत्सल मां प्रणतं
त्रिभुवनपावन पाहि रवे ॥ १० ॥
इति सकलजगत्प्रसूतिभूतं
त्रिभुवनपावनधामभूतं ।
रविमखिलजगत्प्रदीपभूतं
देवं प्रणतोऽस्मि विश्वकर्मा ॥ ११ ॥

इति श्रीमार्कण्डेयपुराणे सूर्य्यस्तवनं नाम ॥ १०७ ॥

---

## अष्टाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवं सूर्य्यस्तवं कुर्व्वन् विश्वकर्मा दिवस्पतेः ।
तजसः षोडशं भागं मण्डलस्थमधारयत् ॥ १ ॥

शातितैस्तेजसो भागैर्दशभिः पञ्चभिस्तथा ।
अतीव कान्तिमच्चारु भानोरासीत्तदा वपुः ॥ २ ॥
शातितञ्चास्य यत्तेजस्तेन चक्रं विनिर्मितं ।
विष्णोः शूलञ्च शर्व्वस्य शिविका धनदस्य च ॥ ३ ॥
दण्डः प्रेतपतेः शक्तिर्देवसेनापतेस्तथा ।
अन्येषाञ्चैव देवानामायुधानि स विश्वकृत् ॥ ४ ॥
चकार तेजसा भानोर्भासुरारयरिशान्तये ।
इति शातिततेजाः स शुशुभे नातितेजसा ॥ ५ ॥
वपुर्दधार मार्त्तण्डः सर्व्वावयवशोभनं ।
स ददर्श समाधिस्थः स्वां भार्य्यां वडवाकृतिं ॥ ६ ॥
अधृष्यां सर्व्वभूतानां तपसा नियमेन च ।
उत्तरांश्च कुरून् गत्वा भूत्वाऽश्वो भानुरागमत् ॥ ७ ॥
सा च दृष्ट्वा तमायान्तं परपुंसो विशङ्कया ।
जगाम संमुखे तस्य पृष्ठरक्षणतत्परा ॥ ८ ॥
ततश्च नासिकायोगं तयोस्तत्र समेतयोः ।
वडवायाञ्च तत्तेजो नासिकाभ्यां विवस्वतः ॥ ९ ॥
देवौ तत्र समुत्पन्नावश्विनौ भिषजां वरौ ।
नासत्यदस्रौ तनयावश्ववक्त्राद्विनिर्गतौ ॥ १० ॥
मार्त्तण्डस्य सुतावेतावश्वरूपधरस्य हि ।
रेतसोऽन्ते च रेवन्तः खड्गी धन्वी तनुत्रधृक् ॥ ११ ॥
अश्वारूढः समुद्भूतो वाणतूणसमन्वितः ।
ततः स्वरूपममलं दर्शयामास भानुमान् ॥ १२ ॥

तस्य शान्तं समालोक्य सा रूपं मुदमाददे ।
स्वरूपधारिणीञ्चेमां स निनाय निजालयं ॥ १३ ॥
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ।
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ॥ १४ ॥
द्वितीयश्च यमः शापात् धर्मदृष्टिरनुग्रहात् ।
यमस्तु तेन शापेन भृशं पीडितमानसः ॥ १५ ॥
धर्मोऽभिरोचते यस्मात् धर्मराजस्ततः स्मृतः ।
कृमयो मांसमादाय पादतस्ते महीतलं ॥ १६ ॥
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयं ।
धर्मदृष्टिर्यतश्चासौ समो मित्रे तथाऽहिते ॥ १७ ॥
ततो नियोगे तं याम्ये चकार तिमिरापहः ।
तस्मै ददौ पिता विप्र भागवान् लोकपालतां ॥ १८ ॥
पितृणामाधिपत्यञ्च परितुष्टो दिवाकरः ।
यमुनाञ्च नदीञ्चक्रे कलिन्दान्तरवाहिनीं ॥ १९ ॥
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ।
गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः ॥ २० ॥
एवमप्याह च ततो भगवाँल्लोकभावितः ।
त्वमप्यशेषलोकस्य पूज्यो वत्स भविष्यसि ॥ २१ ॥
अरण्यादिमहादाववैरिदस्युभयेषु च ।
त्वां स्मरिष्यन्ति ये मर्त्या मोक्ष्यन्ते ते महापदः ॥ २२ ॥
क्षेमं बुद्धिं सुखं राज्यमारोग्यं कीर्त्तिमुन्नतिं ।
नराणां परितुष्टस्त्वं पूजितः संप्रदास्यसि ॥ २३ ॥

छायासंज्ञासुतश्चापि सावर्णः सुमहायशाः ।
भाव्यः सोऽनागते काले मनुः सावर्णिकोऽष्टमः ॥ २४ ॥
मेरुपृष्ठे तपो घोरमद्यापि चरते प्रभुः ।
भ्राता शनैश्चरस्तस्य ग्रहोऽभूच्छासनाद्रवेः ॥ २५ ॥
यवीयसी तु या कन्याऽऽदित्यस्याभूद्द्विजोत्तम ।
अभवत्सा सरिच्छ्रेष्ठा यमुना लोकपावनी ॥ २६ ॥
यस्तु ज्येष्ठो महाभागः सर्गो यस्येह साम्प्रतं ।
विस्तरं तस्य वक्ष्यामि मनोर्वैवस्वतस्य ह ॥ २७ ॥
इदं यो जन्म देवानां शृणुयाद्वा पठेत वा ।
विवस्वतस्तनूजानां रवेर्माहात्म्यमेव च ॥ २८ ॥
आपदं प्राप्य मुच्येत प्राप्नुयाच्च महायशः ।
अहोरात्रकृतं पापमेतच्छमयते श्रुतं ।
माहात्म्यमादिदेवस्य मार्त्तण्डस्य महात्मनः ॥ २९ ॥

इति श्रीमार्कण्डेयपुराणे रवेर्माहात्म्यं नाम ॥ १०८ ॥

## नवाधिक शततमोऽध्यायः ॥

क्रौष्टुकिरुवाच ॥

भगवन् कथितः सम्यक् भानोः सन्ततिसम्भवः ।
माहात्म्यमादिदेवस्य स्वरूपञ्चातिविस्तरात् ॥ १ ॥
भूयोऽपि भास्वतः सम्यङ्माहात्म्यं मुनिसत्तम ।
श्रोतुमिच्छाम्यहं तन्मे प्रसन्नो वक्तुमर्हसि ॥ २ ॥

मार्कण्डेय उवाच ॥

श्रूयतामादिदेवस्य माहात्म्यं कथयामि ते ।
विवस्वतो यच्चकार पूर्व्वमाराधितो जनैः ॥ ३ ॥
दमस्य पुत्त्रो विख्यातो राजाऽभूद्राज्यवर्द्धनः ।
स सम्यक् पालनञ्चक्रे पृथिव्याः पृथिवीपतिः ॥ ४ ॥
धर्मतः पाल्यमानन्तु तेन राष्ट्रं महात्मना ।
ववृधेऽनुदिनं विप्र जनेन च धनेन च ॥ ५ ॥
हृष्टपुष्टमतीवासीत्तस्मिन्राजन्यशेषतः ।
राजकं सकलञ्चोर्व्यां पौरजानपदो जनः ॥ ६ ॥
नोपसर्गो न च व्याधिर्न च व्यालोद्भवं भयं ।
न चावृष्टिभयन्तत्र दमपुत्त्रे महीपतौ ॥ ७ ॥
स ईजे च महायज्ञैर्ददौ दानानि चार्थिनां ।
सुधर्मस्याविरोधेन बुभुजे विषयानपि ॥ ८ ॥
तस्यैवं कुर्व्वतो राज्यं सम्यक् पालयतः प्रजाः ।
सप्तवर्षसहस्राणि जग्मुरेकमहो यथा ॥ ९ ॥
विदूरथस्य तनया दाक्षिणात्यस्य भूभृतः ।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥ १० ॥
कदाचित्तस्य सा सुभ्रूः शिरसोऽभ्यञ्जनादृते ।
पश्यतो राजलोकस्य मुमोचाश्रूणि मानिनी ॥ ११ ॥
तदश्रुविन्दवो गात्रे यदा तस्य महीपतेः ।
तदा वीक्ष्याश्रुवदनां तामपृच्छत मानिनीं ॥ १२ ॥
निःशब्दमश्रुमोक्षेण रुदन्तीन्तां विलोक्य वै ।

किमेतदिति पप्रच्छ मानिनीं राज्यवर्धनः ॥ १३ ॥
पृष्टा सा तु ततस्तेन भर्त्रा प्राह मनस्विनी ।
नकिञ्चिदिति तां भूपः पप्रच्छ स महीपतिः ॥ १४ ॥
बहुशः पृच्छतस्तस्य भूभृतः सा सुमध्यमा ।
दर्शयामास पलितं केशभारान्तरोद्भवं ॥ १५ ॥
एतत्पश्येति भूपाल किमिदं मन्युकारणं ।
ममातिमन्दभाग्याया जहासाथ नृपस्ततः ॥ १६ ॥
स विहस्याह तां पत्नीं शृण्वतां सर्व्वभूभृतां ।
पौराणाञ्च महीपाला ये तत्रासन् समागताः ॥ १७ ॥
शोकेनालं विशालाक्षि रोदितव्यं न ते शुभे ।
जन्मर्द्धिपरिणामाद्या विकाराः सर्व्वजन्तुषु ॥ १८ ॥
अधीताः सकला वेदा इष्टा यज्ञाः सहस्रशः ।
दत्तं द्विजानां पुत्राश्च समुत्पन्ना वरानने ॥ १९ ॥
भुक्ता भोगास्त्वया सार्द्धं ये मर्त्त्यैरतिदुर्लभाः ।
सम्यक् च पालिता पृथ्वी साधु युद्धेष्वनुष्ठितं ॥ २० ॥
मित्रैः सहेष्टैर्हसितं विहृतं च वनान्तरे ।
किमन्यन्न कृतं भद्रे पलितेभ्यो बिभेषि यत् ॥ २१ ॥
भवन्तु केशाः पलिता वलयः सन्तु मे शुभे ।
शैथिल्यमेतु मे कायः कृतकृत्योऽस्मि मानिनि ॥ २२ ॥
मूर्द्ध्नि यद्दर्शितं भद्रे भवत्या पलितं मम ।
चिकित्सामेष तस्याहं करोमि वनसंश्रयात् ॥ २३ ॥
बाल्ये बालक्रिया पूर्व्वं तद्वत्कौमारके च या ।

यौवने चापि या योग्या वार्द्धके वनसंश्रया ॥ २४ ॥
एवं मत्पूर्व्वकैर्भद्रे कृतन्तत्पूर्व्वकैश्च यत् ।
अतो न तेऽश्रुपातस्य किञ्चित्पश्यामि कारणं ॥ २५ ॥
अलन्ते मन्युना भद्रे नन्वभ्युदयकारि मे ।
दर्शनं पलितस्यास्य मारोदीर्निष्प्रयोजनं ॥ २६ ॥

मार्कण्डेय उवाच ॥

ततः प्रणम्य तं भूपाः पौराश्चैव समीपगाः ।
साम्ना प्रोचुर्महीपालाः महर्षे राज्यवर्द्धनं ॥ २७ ॥
न रोदितव्यमनया तव पत्न्या नराधिप ।
रोदितव्यमिहास्माभिरथवा सर्व्वजन्तुभिः ॥ २८ ॥
त्वं ब्रवीषि यथा नाथ वनवासाश्रितं वचः ।
पतन्ति तेन नः प्राणा लालितानां त्वया नृप ॥ २९ ॥
सर्व्वे यास्यामहे भूप यदि याति भवान् वनं ।
ततोऽशेषक्रियाहानिः सर्व्वपृथ्वीनिवासिनां ॥ ३० ॥
भविष्यति न सन्देहस्त्वयि नाथ वनाश्रये ।
सा च धर्मोपघाताय यदि तत्प्रविमुच्यतां ॥ ३१ ॥
सप्तवर्षसहस्राणि त्वयेयं पालिता मही ।
तत्समुत्थं महापुण्यमालोकय नराधिप ॥ ३२ ॥
वने वसन्महाराज त्वं करिष्यसि यत्तपः ।
तन्महीपालनस्यास्य कलां नार्हन्ति षोडशीं ॥ ३३ ॥

राजोवाच ॥

सप्तवर्षसहस्राणि मयेयं पालिता मही ।

इदानीं वनवासस्य मम कालोऽयमागतः ॥ ३४ ॥
ममापत्यानि जातानि दृष्ट्वा मेऽपत्यसन्ततीः ।
स्वल्पैरेव ममाहोभिरन्तको न सहिष्यति ॥ ३५ ॥
यदेतत्पलितं मूर्द्ध्नि तद्विजानीत नागराः ।
दूतभूतमनार्य्यस्य मृत्योरत्युग्रकर्मणः ॥ ३६ ॥
सोऽहं राज्ये सुतं कृत्वा भोगांस्त्यक्त्वा वनाश्रयः ।
तपस्तप्स्ये समायान्ति न यावद्यमसैनिकाः ॥ ३७ ॥

मार्कण्डेय उवाच ॥

ततो यियासुः स वनं दैवज्ञानवनीपतिः ।
पुत्रराज्याभिषेकाय दिनलग्नान्यपृच्छत ॥ ३८ ॥
श्रुत्वा च ते तु नृपतेर्व्वचो व्याकुलचेतसः ।
दिनं लग्नञ्च होराश्च न विदुः शास्त्रदृष्टयः ॥ ३९ ॥
ऊचुश्च तं महीपालं दैवज्ञा वास्पगद्गदं ।
ज्ञानानि नः प्रणष्टानि श्रुत्वैतत्ते वचो नृप ॥ ४० ॥
ततोऽन्यनगरेभ्यश्च भृत्यराष्ट्रेभ्य एव च ।
ततस्तस्माच्च नगरात् प्राचुर्य्येणाभ्युपागमन् ॥ ४१ ॥
समुत्पत्य महीपालं तं यियासुं मुने वनं ।
प्रकम्पिशिरसो भूत्वा प्रोचुर्ब्राह्मणसत्तमाः ॥ ४२ ॥
प्रसीद पाहि नो राजन् पालिताः स्म यथा पुरा ।
सीदिष्यत्यखिलो लोकस्त्वयि भूप वनाश्रये ॥ ४३ ॥
स कुरुष्व तथा राजन् यथा नो सीदते जगत् ।

यावज्जीवामहे वीर स्वल्पकालमिमे वयं ॥
नेच्छामश्च भवच्छून्यं द्रष्टुं सिंहासनं विभो ॥ ४४ ॥

मार्कण्डेय उवाच ॥

इत्येवं तैस्तथान्यैश्च द्विजैः पौरपुरःसरैः ।
भूपैर्भृत्यैरमात्यैश्च प्रोक्तः प्रोक्तः पुनः पुनः ॥ ४५ ॥
वनवासविनिर्ब्बन्धं नोपसंहरते यदा ।
क्षमिष्यत्यन्तको नेति ददाति च तथोत्तरं ॥ ४६ ॥
ततोऽमात्याश्च भृत्याश्च पौरवृद्धास्तथा द्विजाः ।
समेत्य मन्त्रयामासुः किमत्र क्रियतामिति ॥ ४७ ॥
तेषां मन्त्रयतां विप्र निश्चयोऽयमजायत ।
अनुरागवतान्तत्र महीपालेऽतिधार्मिके ॥ ४८ ॥
सम्यग्ध्यानपरा भूत्वा प्रार्थयामः समाहिताः ।
तपसाराध्य भास्वन्तमायुरस्य महीपतेः ॥ ४९ ॥
तत्रैकनिश्चयाः कार्य्ये केचिद्देहे च भास्करं ।
सम्यगर्घोपचाराद्यैरुपहारैरपूजयन् ॥ ५० ॥
अपरे मौनिनो भूत्वा ऋग्जापेन तथाऽपरे ।
यजुषामथ साम्नाञ्च तोषयाञ्चक्रिरे रविं ॥ ५१ ॥
अपरे च निराहारा नदीपुलिनशायिनः ।
तपसा चक्रुरायस्ता भास्कराराधनं द्विजाः ॥ ५२ ॥
अग्निहोत्रपराश्चान्ये रविसूक्तान्यहर्निशं ।
जेपुस्तत्रापरे तस्थुर्भास्करे न्यस्तदृष्टयः ॥ ५३ ॥
इत्येवमतिनिर्बन्धं भास्कराराधनं प्रति ।

बहुप्रकारं चक्रुस्ते तं तं विधिमुपाश्रिताः ॥ ५४ ॥
तथा तु यततां तेषां भास्कराराधनं प्रति ।
सुदामा नाम गन्धर्व्व उपगम्येदमब्रवीत् ॥ ५५ ॥
यद्याराधनमिष्टं वो भास्करस्य द्विजातयः ।
तदेतत् क्रियतां येन भानुः प्रीतिमुपैष्यति ॥ ५६ ॥
तस्माद्गुरुविशालाख्यं वनं सिद्धनिषेवितं ।
कामरूपे महाशैले गम्यतान्तत्र वै लघु ॥ ५७ ॥
तस्मिन्नाराधनं भानोः क्रियतां सुसमाहितैः ।
सिद्धक्षेत्रं हितं तत्र सर्व्वकामानवाप्स्यथ ॥ ५८ ॥

मार्कण्डेय उवाच ॥

इति ते तद्वचः श्रुत्वा गत्वा तत् काननं द्विजाः ।
ददृशुर्भास्वतस्तत्र पुण्यमायतनं शुभं ॥ ५९ ॥
तत्र ते नियताहारा वर्णा विप्रादयो द्विज ।
धूपपुष्पोपहाराद्यां पूजाञ्चक्रुरतन्द्रिताः ॥ ६० ॥
पुष्पानुलेपनाद्यैश्च धूपगन्धादिकैस्तथा ।
जपहोमान्नदीपाद्यैः पूजनन्ते समाहिताः ॥
कुर्व्वन्तस्तुष्टुवुर्ब्रह्मन् विवस्वन्तं द्विजातयः ॥ ६१ ॥

ब्राह्मणा ऊचुः ॥

देवदानवयक्षाणां ग्रहाणां ज्योतिषामपि ।
तेजसाभ्यधिकं देवं व्रजाम शरणं रविं ॥ ६२ ॥
दिवि स्थितञ्च देवेशं द्योतयन्तं समन्ततः ।
वसुधामन्तरीक्षञ्च व्याप्नुवन्तं मरीचिभिः ॥ ६३ ॥

आदित्यं भास्करं भानुं सवितारं दिवाकरं ।
पूषाणमार्यमाणं च स्वर्भानुं दीप्तदीधितिं ॥ ६४ ॥
चतुर्युगान्तकालाग्निं दुष्प्रेक्ष्यं प्रलयान्तगं ।
योगीश्वरमनन्तं च रक्तं पीतं सितासितं ॥ ६५ ॥
ऋषीणामग्निहोत्रेषु यज्ञदेवेष्ववस्थितं ।
अक्षरं परमं गुह्यं मोक्षद्वारमनुत्तमं ॥ ६६ ॥
छन्दोभिरश्वरूपैश्च सकृद्युक्तैर्विहङ्गमं ।
उदयास्तमने युक्तं सदा मेरोः प्रदक्षिणे ॥ ६७ ॥
अन्टतञ्च ऋतञ्चैव पुण्यतीर्थं पृथग्विधं ।
विश्वस्थितिमचिन्त्यञ्च प्रपन्नाःस्म प्रभाकरं ॥ ६८ ॥
यो ब्रह्मा यो महादेवो यो विष्णुर्यः प्रजापतिः ।
वायुराकाशमापश्च पृथिवीगिरिसागराः ॥ ६९ ॥
ग्रहनक्षत्रचन्द्राद्या वानस्पत्यं द्रुमौषधं ।
व्यक्ताव्यक्तेषु भूतेषु धर्माधर्मप्रवर्त्तकः ॥ ७० ॥
ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः ।
त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रसीदतु ॥ ७१ ॥
यस्य सर्व्वमजस्येदमङ्गभूतं जगत्प्रभोः ।
स नः प्रसीदतां भास्वान् जगतां यश्च जीवनं ॥ ७२ ॥
यस्यैकभास्वरं रूपं प्रभामण्डलदुर्दृशं ।
द्वितीयमैन्दवं सौम्यं स नो भास्वान् प्रसीदतु ॥ ७३ ॥
ताभ्याञ्च यस्य रूपाभ्यामिदं विश्वं विनिर्मितं ।
अग्नीषोममयं भास्वान् स नो देवः प्रसीदतु ॥ ७४ ॥

मार्कण्डेय उवाच ॥

इत्थं स्तुत्वा तदा भक्त्या सम्यक् पूजयतान्तथा ।
तुतोष भगवान् भास्वांस्त्रिभिर्मासैर्द्विजोत्तम ॥ ७५ ॥
ततः स मण्डलादुद्यन्निजबिम्बसमप्रभः ।
अवतीर्य्य ददौ तेभ्यो दुर्द्दशो दर्शनं रविः ॥ ७६ ॥
ततस्ते स्पष्टरूपं तं सवितारमजं जनाः ।
पुलकोत्कम्पिनो विप्रा भक्तिनम्राः प्रणेमिरे ॥ ७७ ॥

नमो नमस्तेऽस्तु सहस्ररश्मे
सर्व्वस्य हेतुस्त्वमशेषकेतुः ।
पातात्त्वमीड्योऽखिलयज्ञधाम
ध्येयस्तथा योगविदां प्रसीद ॥ ७८ ॥

इति श्रीमार्कण्डेयपुराणे भानुस्तवः ॥ १०९ ॥

---

दशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततः प्रसन्नो भगवान् भानुराहाखिलं जनं ।
व्रियतां यदभिप्रेतं मत्तः प्राप्तुं द्विजादयः ॥ १ ॥

मार्कण्डेय उवाच ॥

ततस्ते प्रणिपत्योचुर्विप्र विप्रादयो जनाः ।
ससाध्वसमशीतांशुमवलोक्य पुरः स्थितं ॥ २ ॥

प्रजा ऊचुः ॥

ततस्तं प्रणिपत्योचुर्वरदं जगदीश्वरं ।
भगवन् यदि नो भक्त्या प्रसन्नस्तिमिरापह ॥ ३ ॥
दशवर्षसहस्राणि ततो नो जीवतां नृपः ।
निरामयो जितारातिः सुकोषः स्थिरयौवनः ॥
दशवर्षसहस्राणि जीवतां राज्यवर्द्धनः ॥ ४ ॥

मार्कण्डेय उवाच ॥

तथेत्युक्ता जनान् भास्वान् दृष्टशोऽभून्महामुने ।
तेऽपि लब्धवरा हृष्टाः समाजग्मुर्जनेश्वरं ॥ ५ ॥
यथा वृत्तञ्च ते तस्मै नरेन्द्राय न्यवेदयन् ।
वरं लब्ध्वा सहस्रांशोः सकाशादखिलं द्विज ॥ ६ ॥
तच्छ्रुत्वा जहृषे तस्य सा पत्नी मानिनी द्विज ।
स च राजा चिरं दध्यौ नाह किञ्चिच्च तं जनं ॥ ७ ॥
ततः सा मनिनी भूपं हर्षापूरितमानसा ।
दिष्ट्याऽऽयुषा महीपाल वर्द्धस्वेत्याह तं पतिं ॥ ८ ॥
तथा तया मुदा भर्त्ता मानिन्याथ सभाजितः ।
नाह किञ्चिन्महीपालश्चिन्ताजडमना द्विज ॥ ९ ॥
सा पुनः प्राह भर्त्तारं चिन्तयानमधोमुखं ।
कस्मान्न हर्षमभ्येषि परमाभ्युदये नृप ॥ १० ॥
दशवर्षसहस्राणि निरुजः स्थिरयौवनः ।
भावी त्वमद्य प्रभृति किं तथापि न हृष्यसे ॥ ११ ॥
किन्तु तत्कारणं ब्रूहि यच्चिन्ताकृष्टमानसः ।

परमाभ्युदयेऽपि त्वं संप्राप्ते पृथिवीपते ॥ १२ ॥

राजोवाच ॥

कथमभ्युदयो भद्रे किं सभाजयसे च मां ।
प्राप्तौ दुःखसहस्राणां किं सभाजनयिष्यते ॥ १३ ॥
दशवर्षसहस्राणि जीविष्याम्यहमेककः ।
न त्वं तव विपत्तौ मे किन्न दुःखं भविष्यति ॥ १४ ॥
पुत्रान् पौत्रान् प्रपौत्रांश्च तथान्यानिष्टबान्धवान् ।
पश्यतो मे मृतान् दुःखं किमल्पं हि भविष्यति ॥ १५ ॥
भृत्येषु चातिभक्तेषु मित्रवर्गे तथा मृते ।
भद्रे दुःखमपारं मे भविष्यति तु सन्ततं ॥ १६ ॥
यैर्मदर्थं तपस्तप्तं कृशैर्धर्मनिसन्ततैः ।
ते मरिष्यन्त्यहं भोगी जीविष्यामीति धिक्कृतं ॥ १७ ॥
सेयमापद्वरारोहे प्राप्ता नाभ्युदयो मम ।
कथं वा मन्यसे न त्वं यत्सभाजयसेऽद्य मां ॥ १८ ॥

मानिन्युवाच ॥

महाराज यथात्थ त्वं तथैवन्नात्र संशयः ।
मया पौरैश्च दोषोऽयं प्रीत्या नालोकितस्तव ॥ १९ ॥
एवं गतेऽत्र किं कार्य्यं नरनाथ विचिन्त्यतां ।
नान्यथा भावि यत्प्राह प्रसन्नो भगवान्रविः ॥ २० ॥

राजोवाच ॥

उपकारः कृतः पौरैः प्रीत्या भृत्यैश्च यो मम ।
कथं भोक्ष्याम्यहं भोगान् गत्वा तेषामनिष्कृतिं ॥ २१ ॥

सोऽहमद्य प्रभृत्यद्रिं गत्वा नियतमानसः ।
तपस्तप्स्ये निराहारो भानोराराधनोद्यतः ॥ २२ ॥
दशवर्षसहस्राणि यथाहं स्थिरयौवनः ।
तस्य प्रसादाद्देवस्य जीविष्यामि निरामयः ॥ २३ ॥
तथा यदि प्रजाः सर्व्वाः भृत्यास्त्वञ्च सुताश्च मे ।
पुत्राः पौत्राः प्रपौत्राश्च सुहृदश्च वरानने ॥ २४ ॥
जीवन्त्येतं प्रसादं नः करोति भगवान्रविः ।
ततोऽहं भविता राज्ये भक्ष्ये भोगांस्तथा मुदा ॥ २५ ॥
नचेदेवं करोत्यर्कस्तदद्रौ तत्र मानिनि ।
तपस्तप्स्ये निराहारो यावज्जीवितसंक्षयः ॥ २६ ॥

मार्कण्डेय उवाच ॥

इत्युक्ता सा तदा तेन तथेत्याह नराधिपं ।
जगाम तेन च समं साऽपि तं धरणीधरं ॥ २७ ॥
स तदायतनं गत्वा भार्यया सह पार्थिवः ।
भानोराराधनञ्चक्रे शुश्रूषानिरतो द्विज ॥ २८ ॥
निराहारकृशः सा च यथासौ पृथिवीपतिः ।
तेपे तपस्तथैवोग्रं शीतवातातपक्षमा ॥ २९ ॥
तस्य पूजयतो भानुं तप्यतश्च तपो महत् ।
साग्रे संवत्सरे याते ततः प्रीतो दिवाकरः ॥ ३० ॥
समस्तभृत्यपौरादिपुत्राणां च कृते द्विज ।
ददौ यथाभिलषितं वरं द्विजवरोत्तम ॥ ३१ ॥

लब्ध्वा वरं स नृपतिः समभ्येत्यात्मनः पुरं ।
चकार मुदितो राज्यं प्रजा धर्मेण पालयन् ॥ ३२ ॥
ईजे यज्ञान् स च बहून् ददौ दानान्यहर्निशं ।
मानिन्या सहितो भोगान् बुभुजे च स धर्मवित् ॥ ३३ ॥
दशवर्षसहस्राणि पुत्रपौत्रादिभिः सह ।
भृत्यैः पौत्रैः समुदितः सोऽभवत् स्थिरयौवनः ॥ ३४ ॥
तस्येति चरितं दृष्ट्वा प्रमतिर्नाम भार्गवः ।
विस्मयाकृष्टहृदयो गाथामेतामगायत ॥ ३५ ॥
भानुभक्तेरहो शक्तिर्यद्राजा राज्यवर्द्धनः ।
आयुषो वर्द्धने जातः स्वजनस्य तथात्मनः ॥ ३६ ॥
इति ते कथितं विप्र यत्पृष्टोऽहं त्वया विभो ।
आदिदेवस्य माहात्म्यमादित्यस्य विवस्वतः ॥ ३७ ॥
विप्रैस्तदखिलं श्रुत्वा भानोर्माहात्म्यमुत्तमं ।
पठंश्च मुच्यते पापैः सप्तरात्रकृतं नरः ॥ ३८ ॥
अरोगी धनवानाढ्यः कुले महति धीमतां ।
जायते च महाप्राज्ञो यश्चैतद्धारयेद्बुधः ॥ ३९ ॥
मन्त्राश्च येऽत्राभिहता भास्वतो मुनिसत्तम ।
जापः प्रत्येकमेतेषां त्रिसन्ध्यं पातकापहः ॥ ४० ॥
समस्तमेतन्माहात्म्यं यत्र चायतने रवेः ।
पठ्यते तत्र भगवान् सान्निध्यं न विमुञ्चति ॥ ४१ ॥
तस्मादेतत् त्वया ब्रह्मन् भानोर्माहात्म्यमुत्तमं ।
धार्य्यं मनसि जाप्यञ्च महत्पुण्यमभीप्सता ॥ ४२ ॥

सुवर्णशृङ्गीमतिशोभनाङ्गीं
पयस्विनीं गां प्रददाति यो हि ।
शृणोति चैतत् त्र्यहमात्मवान्नरः
समं तयोः पुण्यफलं द्विजाग्र्यं ॥ ४३ ॥

इति श्रीमार्कण्डेयपुराणे भानोर्म्माहात्म्यं समाप्तं ॥ ११० ॥

## एकादशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवंप्रभावो भगवाननादिनिधनो रविः ।
यस्य त्वं क्रौष्टुके भक्त्या माहात्मंत्र मयि पृच्छसि ॥ १ ॥
परमात्मा स योगीनां युञ्जतां चेतसां लयं ।
क्षेत्रज्ञः सांख्ययोगानां यज्ञेशो यज्विनामपि ॥ २ ॥
सूर्य्याधिकारं वहतो विष्णोरीशस्य वेधसः ।
मनुस्तस्याभवत्पुत्त्रश्छिन्नसर्व्वार्थसंशयः ॥ ३ ॥
मन्वन्तराधिपो विप्र यस्य सप्तममन्तरं ।
इक्ष्वाकुर्नाभगो रिष्टो महाबलपराक्रमाः ॥ ४ ॥
नरिष्यन्तोऽथ नाभागः पृषध्रो धृष्ट एव च ।
एते पुत्त्रा मनोस्तस्य पृथग्राज्यस्य पालकः ॥ ५ ॥
विख्यातकीर्त्तयः सर्व्वे सर्व्वे शास्त्रास्त्रपारगाः ।
विशिष्टतरमन्विच्छन् मनुः पुत्त्रं तथा पुनः ॥ ६ ॥

मित्रावरुणयोरिष्टिं चकार कृतिनां वरः ।
यत्र चापहृते होतुरपचारान्महामुने ॥ ७ ॥
इला नाम समुत्पन्ना मनोः कन्या सुमध्यमा ।
तां दृष्ट्वा कन्यकान्तत्र समुत्पन्नां ततो मनुः ॥ ८ ॥
तुष्टाव मित्रावरुणौ वाक्यञ्चेदमुवाच ह ।
भवत्प्रसादात्तनयो विशिष्टो मे भवेदिति ॥ ९ ॥
कृते मखे समुत्पन्ना तनया मम धीमतः ।
यदि प्रसन्नौ वरदौ तदियन्तनया मम ॥ १० ॥
प्रसादाद्भवतोः पुत्रो भवत्वतिगुणान्वितः ।
तथेति चाभ्यामुक्ते तु देवाभ्यां सैव कन्यका ॥ ११ ॥
इला समभवत् सद्यः सुद्युम्न इति विश्रुतः ।
पुनश्चेश्वरकोपेन मृगव्यामटता वने ॥ १२ ॥
स्त्रीत्वमासादितन्तेन मनुपुत्रेण धीमता ।
पुरूरवसनामानं चक्रवर्त्तिनमूर्ज्जितं ॥ १३ ॥
जनयामास तनयं यत्र सोमसुतो बुधः ।
जाते सुते पुनः कृत्वा सोऽश्वमेधं महाक्रतुं ॥ १४ ॥
पुरुषत्वमनुप्राप्तः सुद्युम्नः पार्थिवोऽभवत् ।
सुद्युम्नस्य त्रयः पुत्रा उत्कलो विनयो गयः ॥ १५ ॥
पुरुषत्वे महावीर्य्या यज्विनः पृथुलौजसः ।
पुरुषत्वे तु ये जातास्तस्य राज्ञस्त्रयः सुताः ॥ १६ ॥
बुभुजुस्ते महीमेतां धर्मे नियतचेतसः ।
स्त्रीभूतस्य तु यो जातस्तस्य राज्ञः पुरूरवाः ॥ १७ ॥

न स लेभे महीभागं यतो बुधसुतो हि सः ।
ततो वशिष्ठवचनात् प्रतिष्ठानं पुरोत्तमं ॥
तस्मै दत्तं स राजाभूत्तचातीवमनोहरे ॥ १८ ॥

इति श्रीमार्कण्डेयपुराणे वंशानुक्रमो नाम ॥ १११ ॥

द्वादशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

पृषध्राख्यो मनोः पुत्रो मृगव्यामगमद्वनं ।
तत्र चंक्रममाणोऽसौ विपिने निर्जने वने ॥ १ ॥
नाससाद मृगं कञ्चिद्भानुदीधितितापितः ।
क्षुत्तृट्तापपरीताङ्ग इतश्चेतश्च चंक्रमन् ॥ २ ॥
स ददर्श तदा तत्र होमधेनुं मनोहरां ।
न तावता न सन्धृष्टं ब्राह्मणस्याग्निहोत्रिणः ॥ ३ ॥
स मन्यमानो गवयमिषुणा तामताडयत् ।
पपात सापि तद्बाणविभिन्नहृदया भुवि ॥ ४ ॥
ततोऽग्निहोत्रिणः पुत्रो ब्रह्मचारी तपोरतिः ।
शप्तवान् स पितुर्दृष्ट्वा होमधेनुं निपातितां ॥ ५ ॥
गोपालः प्रेषितः पुत्रो बाभ्रव्यो नाम नामतः ।
कोपामर्षपराधीनचित्तवृत्तिस्ततो मुने ॥ ६ ॥
चुकोप विगलत्स्वेदजललोलाविलेक्षणः ।
तं क्रुद्धं प्रेक्ष्य स नृपः पृषध्रो मुनिदारकं ॥ ७ ॥

प्रसीदेति जगौ कस्मात् शूद्रवत् कुरुषे रुषं ।
न क्षत्रियं न वा वैश्यमेवं क्रोधमुपैति वै ॥
यथा त्वं शूद्रवज्जातो विशिष्टे ब्रह्मणः कुले ॥ ८ ॥

मार्कण्डेय उवाच ॥

इति निर्भर्त्सितस्तेन स राज्ञा मौलिनः सुतः ।
शशाप तं दुरात्मानं शूद्र एव भविष्यति ॥ ९ ॥
प्रयास्यति क्षयं ब्रह्म यत्तेऽधीतं गुरोर्मुखात् ।
होमधेनुर्मम गुरोर्यदियं हिंसिता त्वया ॥ १० ॥
एवं शप्तो नृपः क्रुद्धस्तच्छापपरिपीडितः ।
प्रतिशापपरो विप्र तोयं जग्राह पाणिना ॥ ११ ॥
सोऽपि राज्ञो विनाशाय कोपञ्चक्रे द्विजोत्तमः ।
तमभ्येत्य त्वरायुक्तो वारयामास वै पिता ॥ १२ ॥
वत्सालमलमत्यर्थं कोपेनायातिवैरिणा ।
ऐहिकामुष्मिकहितः शम एव द्विजन्मनां ॥ १३ ॥
कोपस्तपो नाशयति क्रुद्धो भ्रस्यत्यथायुषः ।
क्रुद्धस्य गलते ज्ञानं क्रुद्धश्चार्थाच्च हीयते ॥ १४ ॥
न धर्मः क्रोधशीलस्य नार्थञ्चाप्नोति रोषणः ।
नालं सुखाय कामाप्तिः कोपेनाविष्टचेतसां ॥ १५ ॥
यदि राज्ञा हता धेनुरियं विज्ञानिना सता ।
युक्तमत्र दयां कर्त्तुमात्मनो हितबोधिना ॥ १६ ॥
अथवाऽजानता धेनुरियं व्यापादिता मम ।
तत्कथं शापयोग्योऽयं दुष्टं नास्य मनो यतः ॥ १७ ॥

आत्मनो हितमन्विच्छन् बाधते योऽपरं नरः ।
कर्त्तव्या मूढविज्ञाने दया तत्र दयालुभिः ॥ १८ ॥
अज्ञानतः कृते दण्डं पातयन्ति बुधा यदि ।
बुधेभ्यस्तमहं मन्ये वरमज्ञानिनो नराः ॥ १९ ॥
नाद्य शापस्त्वया देयः पार्थिवस्यास्य पुत्रक ।
स्वकर्म्मणैव पतिता गौरेषा दुःखमृत्युना ॥ २० ॥

मार्कण्डेय उवाच ॥

पृषध्रोऽपि मुनेः पुत्रं प्रणम्यानम्रकन्धरः ।
प्रसीदेति जगादोच्चैरज्ञानाद्घातितेति च ॥ २१ ॥
मया गवयबुद्ध्या गौरबध्या घातिता मुने ।
अज्ञानाद्धोमधेनुस्ते प्रसीद त्वञ्च नो मुने ॥ २२ ॥

ऋषिपुत्र उवाच ॥

आजन्मनो महीपाल न मया व्याहृतं मृषा ।
क्रोधश्चाद्य महाभाग नान्यथा मे कदाचन ॥ २३ ॥
तन्नाहमेनं शक्नोमि शापं कर्त्तुं नृपान्यथा ।
यस्ते समुद्यतः शापो द्वितीयः स निवर्त्तितः ॥ २४ ॥
इत्युक्तवन्तं तं बालमादाय स पिता ततः ।
जगाम स्वाश्रमं सोऽपि पृषध्रः शूद्रतामगात् ॥ २५ ॥

इति श्रीमार्कण्डेयपुराणे पृषध्रोपाख्याने ॥ ११२ ॥

त्रयोदशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

कारूषाः क्षत्रियाः शूराः करूषस्याभवन् सुताः ।
ते तु सप्तशता वीरास्तेभ्यश्चान्ये सहस्रशः ॥ १ ॥
दिष्टपुत्रस्तु नाभागः स्थितः प्रथमयौवने ।
ददर्श वैश्यतनयामतीव सुमनोहरां ॥ २ ॥
तस्यां स दृष्टमात्रायां मदनाक्षिप्तमानसः ।
बभूव भूपतनयो निःश्वासाक्षेपतत्परः ॥ ३ ॥
तस्याः स गत्वा जनकं वव्रे तां वैश्यकन्यकां ।
ततोऽनङ्गपराधीनमनोवृत्तिं नृपात्मजं ॥ ४ ॥
तमाह स पिता तस्या राजपुत्रं कृताञ्जलिः ।
बिभ्यत्तस्य पितुर्विप्र प्रश्रयावनतं वचः ॥ ५ ॥
भवन्तो भूभुजो भृत्या वयं वः करदायकाः ।
कथं सम्बन्धमसमैरस्माभिरभिवाञ्छसि ॥ ६ ॥

राजपुत्र उवाच ॥

साम्यं मानुषदेहस्य काममोहादिभिः कृतं ।
तथापि काले तैरेव योज्यते मानुषं वपुः ॥ ७ ॥
तथैव चोपकाराय जायन्ते तस्य तान्यपि ।
अन्यानि चान्ये जीवन्ति भिन्नजातिमतां सतां ॥ ८ ॥
तथान्यानप्ययोग्यानि योग्यतां यान्ति कालतः ।
योग्यान्ययोग्यतां यान्ति कालवश्या हि योग्यता ॥ ९ ॥

आप्याय्यते यच्छरीरमाहारादिभिरीप्सितैः ।
कालं ज्ञात्वा तथा भुक्तं तदेव परिशिष्यते ॥ १० ॥
इत्थं ममैषाभिमता तनया दीयतां त्वया ।
अन्यथा मच्छरीरस्य विपत्तिरुपलक्ष्यते ॥ ११ ॥

वैश्य उवाच ॥

परतन्त्रा वयं त्वञ्च परतन्त्रो महीभुजः ।
पित्रा तेनाभ्यनुज्ञातस्त्वं गृहाण ददाम्यहं ॥ १२ ॥

राजपुत्र उवाच ॥

प्रष्टव्याः सर्व्वकार्य्येषु गुरवो गुरुवर्त्तिभिः ।
नत्वीदृशेष्वकार्य्येषु गुरूणां वाक्य गोचरः ॥ १३ ॥
क्व मन्मथकथालापो गुरूणां श्रवणं कथं ।
विरुद्धमेतदन्यच्च प्रष्टव्या गुरवो नृभिः ॥ १४ ॥

वैश्य उवाच ॥

एवमेतत्स्मरालापस्तवायं पृच्छतो गुरुं ।
अहं पृच्छामि नालापो मम कामकथाश्रयः ॥ १५ ॥

मार्कण्डेय उवाच ॥

इत्युक्तः सोऽभवन्मौनी राजपुत्रः स चापि तत् ।
तत्पित्रे सर्व्वमाचष्ट राजपुत्रस्य यन्मतं ॥ १६ ॥
ततस्तस्य पिता विप्रान्ऋचीकादीन् द्विजोत्तमान् ।
प्रवेश्य राजपुत्रञ्च यथाख्यातं न्यवेदयत् ॥ १७ ॥
निवेद्य च ततः प्राह मुनीनेवं व्यवस्थितः ।
यत्कर्त्तव्यं तदादेष्टुमर्हन्ति द्विजसत्तमाः ॥ १८ ॥

ऋषय ऊचुः ॥

राजपुत्रानुरागस्ते यद्यस्यां वैश्यसन्ततौ ।
तदस्तु धर्म एवैष किन्तु न्यायक्रमेण सः ॥ १९ ॥
मूर्द्धाभिषिक्ततनयापाणिग्राहोऽभवत्पुरा ।
भवत्वनन्तरञ्चेयं तव भार्य्या भविष्यति ॥ २० ॥
एवं नदोषो भवति तथेमामुप भुञ्जतः ।
अन्यथाऽभ्येति ते जातिरुत्कृष्टाबालिकां हरन् ॥ २१ ॥

मार्कण्डेय उवाच ॥

इत्युक्तस्तदपास्यैव वचस्तेषां महात्मनां ।
विनिष्क्रम्य गृहीत्वा तामुद्यतासिरथाब्रवीत् ॥ २२ ॥
राक्षसेन विवाहेन मया वैश्यसुता हृता ।
यस्य सामर्थ्यमत्रास्ति स एतां मोचयत्विति ॥ २३ ॥
ततः स वैश्यस्तां दृष्ट्वा गृहीतां तनयां द्रुतं ।
त्राहीति पितरन्तस्य प्रययौ शरणं द्विज ॥ २४ ॥
ततस्तस्य पिता क्रुद्ध आदिदेश बलं महत् ।
हन्यतां हन्यतां दुष्टो नाभागो धर्मदूषकः ॥ २५ ॥
ततस्तद्युयुधे सैन्यं तेन भूभृत्सुतेन वै ।
कृतास्त्रेण तदास्त्रेण तत्प्राचुर्य्येण पातितं ॥ २६ ॥
स श्रुत्वा निहतं सैन्यं राजपुत्रेण भूपतिः ।
स्वयमेव ययौ योद्धुं स्वसैन्यपरिवारितः ॥ २७ ॥
ततो युद्धमभूत्तस्य भूभुजः स्वसुतेन यत् ।
राजपुत्रेण शस्त्रास्त्रैस्तत्रातिशयितः पिता ॥ २८ ॥

ततोऽन्तरीक्षादागत्य परिव्राट् सहसा मुनिः ।
प्रत्युवाच महीपालं विरमस्वेति संयुगात् ॥ २९ ॥
त्वत्पुत्रस्य महाभाग विधर्मोऽयं महात्मनः ।
तवापि वैश्येन सह न युद्धं धर्मवन्नृप ॥ ३० ॥
ब्राह्मणो ब्राह्मणीपूर्व्वं कुर्व्वन्दारपरिग्रहं ।
ब्राह्मण्यात् सर्व्ववर्णेषु न हानिमुपगच्छति ॥ ३१ ॥
तथैव क्षत्रियसुतां क्षत्रियः पूर्व्वमुद्वहन् ।
इतरे च ततो राजंश्चावन्ते न स्वधर्मतः ॥ ३२ ॥
पूर्व्वं वैश्यस्तथा वैश्यां पश्चात् शूद्रकुलोद्भवां ।
न हीयते वैश्यकुलादयं न्यायः क्रमोदितः ॥ ३३ ॥
ब्राह्मणाः क्षत्रिया वैश्याः सवर्णापाणिसंग्रहं ।
अकृत्वाऽन्यतरापाणेः पतन्ति नृप संग्रहात् ॥ ३४ ॥
यस्या यस्या हि हीनायाः कुरुते पाणिसंग्रहं ।
अकृत्वा वर्णसंयोगं नोऽपि तद्वस्तुभाग्भवेत् ॥ ३५ ॥
सोऽयं वैश्यत्वमापन्नस्तव पुत्रः स मन्दधीः ।
नास्याधिकारो युद्धाय क्षत्रियेण त्वया सह ॥ ३६ ॥
वयमेतन्न जानीमः कारणं नृपनन्दन ।
यथा भविष्यतीदञ्च निवर्त्त रणकर्मतः ॥ ३७ ॥

इति श्रीमार्कण्डेयपुराणे नाभागचरिते ॥ ११२ ॥

## चतुर्द्दशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

निवृत्तोऽसौ ततो भूपः संग्रामात् स्वसुतेन वै ।
उपयेमे च तां वैश्यतनयां सोऽपि तत्सुतः ॥ १ ॥
ततः स वैश्यतां प्राप्तः समुत्पत्याह पार्थिवं ।
भूपाल यन्मया कार्य्यं तत्समादिश्यतां मम ॥ २ ॥

राजोवाच ॥

धर्माधिकरणे युक्ता बाभ्रव्याद्यास्तपस्विनः ।
यदस्य कर्म धर्माय तद्वदन्तु तथा चर ॥ ३ ॥

मार्कण्डेय उवाच ॥

ततस्ते मुनयस्तस्य पाशुपाल्यं तथा कृषिं ।
वाणिज्यञ्च परं धर्ममाचचक्षुः सभासदः ॥ ४ ॥
तथा च चक्रे स सुतस्तस्य राज्ञो यथोदितं ।
तैर्धर्मवादिभिर्धर्मं च्युतस्य निजधर्मतः ॥ ५ ॥
तस्य पुत्रस्ततो जातो नाम्ना ख्यातो भनन्दनः ।
स मात्रा प्रहितोऽगच्छद्गोपालो भव पुत्रक ॥ ६ ॥
मात्रा तथा नियुक्तोऽथ प्रणिपत्य स्वमातरं ।
राजर्षिमगमन्नीपं हिमवत्पर्व्वताश्रयं ॥ ७ ॥
तं समेत्य स जग्राह तस्य पादौ यथाविधि ।
प्रणिपत्याह चैवैनं राजर्षिं स भनन्दनः ॥ ८ ॥

आदिष्टो भगवन्मात्रा गोपालस्त्वं भवेति वै ।
मया च पालनीया क्ष्मा तस्याः स्वीकरणं कथं ॥ ९ ॥
मया हि गौः पालनीया सा यदा स्वीकृता भवेत् ।
आक्रान्ता बलवद्भिः सा दायादैः पृथिवी मम ॥ १० ॥
तां यथा प्राप्नुयां पृथ्वीं त्वत्प्रसादादहं विभो ।
तथादिश करिष्यामि तवाज्ञां प्रणतोऽस्मि ते ॥ ११ ॥

मार्कण्डेय उवाच ॥

ततः स नीपो राजर्षिस्तस्मै निरवशेषतः ।
भनन्दाय ददौ ब्रह्मन्नस्त्रग्रामं महात्मने ॥ १२ ॥
प्राप्तास्त्रविद्यः स ययौ पितृव्यतनयान् द्विज ।
वसुरातादिकान् पुत्त्रानादिष्टः स महात्मना ॥ १३ ॥
अयाचत स राज्यार्द्धं पितृपैतामहोचितं ।
ते चोचुर्वैश्यपुत्त्रस्त्वं कथं भोक्ष्यसि मेदिनीं ॥ १४ ॥
ततस्तैर्युद्धमभवद्भनन्दस्यात्मवंशजैः ।
वसुरातादिभिः क्रुद्धैः क्षतास्त्रस्यास्त्रवर्षिभिः ॥ १५ ॥
स जित्वा तानशेषांस्तु शस्त्रविक्षतसैनिकान् ।
जहार पृथिवीं तेषां धर्मयुद्धेन धर्मवित् ॥ १६ ॥
स निर्जितारिः सकलां पृथ्वीं राज्यं तथा पितुः ।
निवेदयामास ततस्तत्पिता जगृहे न च ॥
प्रत्युवाच च तं पुत्त्रं भार्य्यायाः पुरतस्तदा । १७ ॥

नाभाग उवाच ॥

भनन्द राज्यमेतत्ते क्रियतां पूर्व्वजैः कृतं ॥ १८ ॥

राजोवाच ॥

अहं न कृतवान्राज्यं नासामर्थ्ययुतः पुरा ।
वैश्यतान्तु पुरस्कृत्य तथैवाज्ञाकरः पितुः ॥ १९ ॥
कृत्वाऽप्रीतिं पितुरहं वैश्यकन्यापरिग्रहात् ।
न पुण्यलोकभाग्राजा यावदाहूतसंप्लवः ॥ २० ॥
उल्लङ्घ्याज्ञां पुनस्तस्य पालयामि महीं यदि ।
नास्ति मोक्षस्ततो नूनं मम कल्पशतैरपि ॥ २१ ॥
न चापि युक्तं त्वद्बाहुनिर्जितं मम मानिनः ।
राज्यं भोक्तुमनीहस्य दुर्बलस्येह कस्यचित् ॥ २२ ॥
राज्यं कुरु स्वयं यावद्दायादेभ्यो विमुञ्च वा ।
ममाज्ञापालनं शस्तं पितुर्न क्षितिपालनं ॥ २३ ॥

मार्कण्डेय उवाच ॥

ततः प्रहस्य तद्भार्य्या सुप्रभा नाम भाविनी ।
प्रत्युवाच पतिं भूप गृह्यतां राज्यमूर्ज्जितं ॥ २४ ॥
न त्वं वैश्यो न चैवाहं जाता वैश्यकुले नृप ।
क्षत्रियस्त्वं तथैवाहं क्षत्रियाणां कुलोद्भवा ॥ २५ ॥
पूर्व्वमासीन्महीपालः सुदेव इति विश्रुतः ।
तस्याभूच्च सखा राज्ञो धूम्राश्वस्य सुतो नलः ॥ २६ ॥
स तेन सख्या सहितो जगामाम्रवनं वनं ।
पत्नीभिः स समं रन्तुं माधवे मासि पार्थिव ॥ २७ ॥
ततः पानान्यनेकानि भक्ष्याणि बुभुजे तथा ।
भार्य्याभिः सहितस्ताभिस्तेन सख्या समन्वितः ॥ २८ ॥

ततः पुष्करिणीतीरे ददर्शातिमनोरमां ।
पत्नीं च्यवनपुत्रस्य प्रमतेः पार्थिवात्मजां ॥ २९ ॥
सखा तस्य नलो मत्तो जगृहे ताञ्च दुर्मतिः ।
पश्यतस्तस्य राज्ञश्च तात तातेतिवादिनीं ॥ ३० ॥
आक्रन्दितं निशम्यैव स तस्याः प्रमतिः पतिः ।
आजगाम त्वरायुक्तः किमेतदिति वै वदन् ॥ ३१ ॥
ततो ददर्श राजानं सुदेवं तत्र संस्थितं ।
गृहीताञ्च तथा पत्नीं नलेन सुदुरात्मना ॥ ३२ ॥
ततः सुदेवं प्रमतिः प्राहायं शास्यतामिति ।
त्वञ्च शास्ता भवान्राजा दुष्टश्चायं नलो नृप ॥ ३३ ॥

मार्कण्डेय उवाच ॥

तस्यार्त्तस्य वचः श्रुत्वा सुदेवो नलगौरवात् ।
प्राह वैश्योऽस्मि गच्छान्यं क्षत्रियं चाणकारणात् ॥ ३४ ॥
ततः स प्रमतिः क्रुद्धस्तेजसा निर्द्दहन्निव ।
प्रत्युवाचाथ राजानं वैश्योऽस्मीत्यभिभाषिणं ॥ ३५ ॥

प्रमतिरुवाच ॥

एवमस्तु भवान् वैश्य क्षत्रियः क्षतरक्षणात् ।
क्षत्रियैर्धार्य्यते शस्त्रं नार्त्तशब्दो भवेदिति ॥
स त्वं न क्षत्रियो भावी वैश्य एव कुलाधमः ॥ ३६ ॥

इति श्रीमार्कण्डेयपुराणे नाभागचरिते ॥ ११४ ॥

पञ्चदशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

तस्मै दत्वा ततः शापं नलं क्रुद्धोऽब्रवीद्द्विज ।
प्रमतिर्भार्गवः कोपात् त्रैलोक्यं निर्दहन्निव ॥ १ ॥
मदोन्मत्तो यदा भार्य्यां भवानत्र ममाश्रमे ।
बलाद्गृह्णासि भस्म त्वं तस्माद्व्रजतु मा चिरं ॥ २ ॥
तेनोदाहृतमात्रे च वाक्ये तस्मिन् तदा नलः ।
देहजेनाग्निना सद्यो भस्मपुञ्जस्तदाऽभवत् ॥ ३ ॥
दृष्ट्वा प्रभावं तत्तस्य सुदेवो विमदस्ततः ।
प्रणामनम्रः प्राहेदं क्षम्यतां क्षम्यतामिति ॥ ४ ॥
यदुक्तवांस्त्वं भगवन् सुरापानमदाकुलं ।
तत्क्षम्यतां प्रसीद त्वं शापोऽयं विनिवर्त्त्यतां ॥ ५ ॥
एवं प्रसादितस्तेन प्रमतिः प्राह भार्गवः ।
गतकोपो नले दग्धे भावहीनेन चेतसा ॥ ६ ॥
नान्यथा भावि तद्वाक्यं यन्मया समुदीरितं ।
तथापि ते करिष्यामि प्रसन्नोऽनुग्रहं परं ॥ ७ ॥
भविता वैश्यजातीयो भवान्नास्त्यत्र संशयः ।
भविता क्षत्रियो वैश्यस्तस्मिन्नेवाशु जन्मनि ॥ ८ ॥
ग्रहीष्यति बलात् कन्यां यदा ते क्षत्रसम्भवः ।
तदा त्वं क्षत्रियो वैश्य स्वगृहीतो भविष्यति ॥ ९ ॥

एवं स वैश्यो भूपाल सुदेवोऽस्मत्पिताऽभवत् ।
अहञ्च या महाभाग त्वत्सर्वं श्रूयतां त्वया ॥ १० ॥
सुरथो नाम राजर्षिः प्रागासीद्गन्धमादने ।
तपस्वी नियताहारस्त्यक्तसङ्गो वनाश्रयः ॥ ११ ॥
ततः श्येनमुखभ्रष्टां दृष्ट्वैकां शारिकां भुवि ।
कृपाऽभूज्जनिता मूर्च्छा तया तस्य महात्मनः ॥ १२ ॥
ततो मूर्च्छावसानेऽहं तस्योत्पन्ना शरीरतः ।
स मां दृष्ट्वा च जग्राह स्निह्यमानेन चेतसा ॥ १३ ॥
यस्मात्कृपाभिभूतस्य मम जातेयमात्मजा ।
तस्मात्कृपावती नाम्ना भविष्यत्याह स प्रभो ॥ १४ ॥
ततोऽहमाश्रमे तस्य वर्धमाना दिवानिशं ।
सखीभिः सह तुल्याभिर्विचरामि वनानि च ॥ १५ ॥
ततो मुनेरगस्त्यस्य भ्रातागस्त्य इति श्रुतः ।
स चिन्वन् कानने वन्यं सखीभिः कोपितोऽशपत् ॥ १६ ॥
नापराधं कृतवती तवाहं द्विजसत्तम ।
अन्यासामपराधेन किमर्थं शप्तवानसि ॥ १७ ॥

ऋषिरुवाच ॥

दुष्टतां दुष्टसंसर्गाददुष्टमपि गच्छति ।
सुराविन्दुनिपातेन पञ्चगव्यघटी यथा ॥ १८ ॥
प्रणिपत्य न दुष्टास्मि यत्त्वयाहं प्रसादितः ।
तस्मादनुग्रहं बाले शृणुयात्ते करोम्यहं ॥ १९ ॥
वैश्ययोनौ यदा जाता त्वं पुत्रं बोधयिष्यसि ।

राज्याय जातिस्मरतां तदा त्वं समवाप्स्यसि ॥ २० ॥
ततो भूयः क्षत्रजातिं प्राप्ता त्वं पतिना सह ।
दिव्यानवाप्स्यसे भोगान् गच्छ भीतिरपैतु ते ॥ २१ ॥
एवं शप्तास्मि राजेन्द्र तेन पूर्व्वं महर्षिणा ।
पिता च मे पूर्व्वमेवं शप्तः प्रमतिनाऽभवत् ॥ २२ ॥
एवं वैश्यो न राजंस्त्वं न च वैश्यः पिता मम ।
न त्वं हि मय्यदुष्टायामदुष्टो दुष्यसे कथं ॥ २३ ॥

इति श्रीमार्कण्डेयपुराणे पञ्चदशाधिक शततमोऽध्यायः ॥ ११५ ॥

---

## षोडशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

इति तस्या वचः श्रुत्वा पुत्रस्य स च पार्थिवः ।
पुनः प्रोवाच धर्मज्ञस्तां पत्नीं तनयन्तथा ॥ १ ॥
यन्मया पितुरादेशात् त्यक्तं राज्यं न तत्पुनः ।
ग्रहीष्यामि वृथोक्तेन किमात्माऽऽक्षिप्यते त्वया ॥ २ ॥
अहं ते संप्रदास्यामि करं वैश्यव्रते स्थितः ।
भुङ्क्ष्व राज्यमशेषं त्वमिच्छया वा परित्यज ॥ ३ ॥
इत्युक्तः स तदा पित्रा राजपुत्रो भनन्दनः ।
चकार राज्यं धर्म्मेण तद्दारपरिग्रहं ॥ ४ ॥
अव्याहतं तस्य चक्रं पृथिव्यामभवद्द्विज ।
न चाधर्म्मे मनो भूपास्तस्य सर्व्वेऽभवन् वशे ॥ ५ ॥

तेनेष्टो विधिवद्यज्ञः सम्यक् शास्ति वसुन्धरां ।
स एवैकोऽभवद्भर्त्ता पृथिव्यां व्याप्तशासनः ॥ ६ ॥
अजायत सुतस्तस्य वत्सप्रीर्नाम नामतः ।
पितातिशयितो येन गुणौघेन महात्मना ॥ ७ ॥
तस्यापि भार्य्या सौनन्दा विदूरथसुताऽभवत् ।
पतिव्रता महाभागा सा प्राप्ता तेन वीर्य्यतः ॥
हत्वा पुरन्दररिपुं कुजृम्भं दितिजेश्वरं ॥ ८ ॥

कौष्टुकिरुवाच ॥

भगवंस्तेन संप्राप्ता कुजृम्भनिधनात् कथं ।
एतदाख्यानमाख्याहि प्रसन्नेनान्तरात्मना ॥ ९ ॥

मार्कण्डेय उवाच ॥

विदूरथो नाम नृपः ख्यातकीर्त्तिरभूद्भुवि ।
तस्य पुत्त्रद्वयं जातं सुनीतिः सुमतिस्तथा ॥ १० ॥
एकदा तु वनं यातो मृगयां स विदूरथः ।
ददर्श गर्त्तं सुमहद्भूमेर्मुखमिवोन्नतं ॥ ११ ॥
तं दृष्ट्वा चिन्तयामास किमेतदिति भैरवं ।
पातालविवरं मन्ये नैतद्भूमेश्चिरन्तनं ॥ १२ ॥
चिन्तयन्निति तत्रासौ ददर्श विजने वने ।
ब्राह्मणं सुव्रतं नाम तपस्विनमुपागतं ॥ १३ ॥
स तं पप्रच्छ च नृपः किमेतदिति विस्मितः ।
अतिगम्भीरमवनेर्दर्शितान्तर्गतोदरं ॥ १४ ॥

ऋषिरुवाच ॥

किन्न वेत्सि महीपाल वागर्थस्त्वं हि मे मतः ।
ज्ञेयं सर्व्वं नरेन्द्रेण वर्त्तते यन्महीतले ॥ १५ ॥
दानवः सुमहावीर्य्यो वसत्युग्रो रसातले ।
स जृम्भयति यत्पृथ्वीं कुजृम्भः प्रोच्यते ततः ॥ १६ ॥
क्रियते तेन यत्किञ्चिद्भूतं भूतं महीतले ।
त्रिदिवे वा नरपते तं कथं वेत्ति नो भवान् ॥ १७ ॥
सुनन्दं नाम मुषलं त्वष्टा यन्निर्मितं पुरा ।
तज्जहार स दुष्टात्मा तेन हन्ति रणे रिपून् ॥ १८ ॥
पातालान्तर्गतस्तेन भिनत्ति वसुधामिमां ।
ततोऽसुराणां सर्व्वेषां द्वाराणि कुरुतेऽसुरः ॥ १९ ॥
तेन भिन्नाच्च वसुधा सुनन्दमुषलायुधा ।
प्रोच्यते वसुधामेतां तमजित्वा कथं भवान् ॥ २० ॥
यज्ञान् विध्वंसयत्युग्रो देवानामुपरोधकः ।
आप्याययति दैतेयान् स बली मुषलायुधः ॥ २१ ॥
यद्यरिं घातयस्येनं पातालान्तरगोचरं ।
ततः समस्तवसुधापतिस्त्वं परमेश्वरः ॥ २२ ॥
मुषलन्तस्य बलिनः सौनन्दं प्रोच्यते जनैः ।
तथा बलाबलञ्चैव तं वदन्ति विचक्षणाः ॥ २३ ॥
तत्तु निर्वीर्य्यतां याति संस्पृष्टं योषिता नृप ।
तस्मिन्दिने द्वितीयेऽह्नि वीर्य्यवत्तदुदीर्य्यते ॥ २४ ॥
न स वेत्ति दुराचारः प्रभावं मुषलस्य तत् ।

योषित्कराग्रसंस्पर्शे दोषं वीर्य्यविशातनं ॥ २५ ॥
एवं तस्य बलं भूप दानवस्य दुरात्मनः ।
मुषलस्य च ते प्रोक्तं यदुक्तं तत्समाचर ॥ २६ ॥
आसन्नमेतद्भवतः पुरस्य पृथिवीपते ।
क्षतन्तेन महीरन्ध्रं निश्चिन्तः किं भवान्यथा ॥ २७ ॥
इत्युक्त्वा तु गते तस्मिन् पुरं गत्वा महीपतिः ।
मन्त्रयामास मन्त्रज्ञैः पुरमध्ये तु मन्त्रिभिः ॥ २८ ॥
यथाश्रुतमशेषन्तत् कथयामास मन्त्रिणां ।
मुषलस्य प्रभावञ्च वीर्य्यशातनमेवच ॥ २९ ॥
तं मन्त्रं क्रियमाणन्तु मन्त्रिभिस्तेन भूभृता ।
तत्पार्श्ववर्त्तिनी कन्या शुश्रावाथ मुदावती ॥ ३० ॥
ततः कतिपयाहे तु तां कन्यां वयसान्वितां ।
जहारोपवनाद्दैत्यः कुजृम्भः स सखीवृतां ॥ ३१ ॥
तत् श्रुत्वा स महीपालः क्रोधपर्य्याकुलेक्षणः ।
पुत्रावुवाच त्वरितं गच्छतं वनकोविदौ ॥ ३२ ॥
निर्विन्ध्यायास्तटे गर्त्तस्तेन गत्वा रसातलं ।
स हन्यतां योऽपहर्त्ता मुदावत्याः सुदुर्मतिः ॥ ३३ ॥

मार्कण्डेय उवाच ॥

ततस्तौ तत्सुतौ प्राप्य तं गर्त्तं तत्पदानुगौ ।
युयुधाते कुजृम्भेन ससैन्येनातिकोपितौ ॥ ३४ ॥
ततः परिघनिस्त्रिंशशक्तिशूलपरश्वधैः ।
बाणैश्चाविरतं युद्धं तेषामासीत् सुदारुणं ॥ ३५ ॥

ततो मायाबलवता तेन दैत्येन तावुभौ ।
राजपुत्रौ रणे बद्धौ निहताशेषसैनिकौ ॥ ३६ ॥
तत् श्रुत्वा स महीपालः प्राहेदं सर्वसैनिकान् ।
बद्धपुत्रः परामार्त्तिमुपेतो मुनिसत्तम ॥ ३७ ॥
यस्तां निहत्य दैतेयं मोचयिष्यति मे सुतां ।
तस्याहं संप्रदास्यामि तामेवायतलोचनां ॥ ३८ ॥
इत्येवं घोषयाञ्चक्रे स राजा स्वपुरे तदा ।
निराशः पुत्रतनयाबन्धमोक्षाय वै मुने ॥ ३९ ॥
ततः शुश्राव वत्सश्रीर्भनन्दनसुतो हि तत् ।
आघोष्यमाणं बलवान् कृतास्त्रः शौर्य्यसंयुतः ॥ ४० ॥
स चागम्याभिवाद्यैनं प्राह पार्थिवसत्तमं ।
विनयावनतो भूत्वा पितुर्मित्रमनुत्तमं ॥ ४१ ॥
आज्ञापयाशु मामेव तनयौ मोचयामि ते ।
तवैव तेजसा हत्वा तं दैत्यं तनयाञ्च ते ॥ ४२ ॥

मार्कण्डेय उवाच ॥

स तं मुदा परिष्वज्य प्रियसख्युरथात्मजं ।
गम्यतामिति संसिद्ध्यै वत्सेत्याह स पार्थिवः ॥ ४३ ॥
स्थाने स्थास्यति मे वत्सो यद्येवं कुरुते विधिं ।
वत्सैतत्क्रियतामाशु यद्युत्साहि मनस्तव ॥ ४४ ॥

मार्कण्डेय उवाच ॥

ततः सखङ्गः सधनुर्बद्धगोधाङ्गुलित्रवान् ।
जगाम वीरः पातालं तेन गर्त्तेन सत्वरः ॥ ४५ ॥

ततो ज्यास्वनमत्युग्रं स चक्रे पार्थिवात्मजः ।
येन पातालमखिलमासीदापूरितान्तरं ॥ ४६ ॥
ततो ज्यास्वनमाकर्ण्य कुजृम्भो दानवेश्वरः ।
आजगामातिकोपेन स्वसैन्यपरिवारितः ॥ ४७ ॥
ततो युद्धमभूत्तस्य तेन पार्थिवसूनुना ।
ससैन्यस्य ससैन्येन बलिनो बलशालिना ॥ ४८ ॥
दिनानि त्रीणि स यदा योधितस्तेन दानवः ।
ततः कोपपरीतात्मा मुषलायाभ्यधावत ॥ ४९ ॥
गन्धैर्माल्यैस्तथा धूपैः पूज्यमानः स तिष्ठति ।
अन्तःपुरे महाभाग प्रजापतिविनिर्मितः ॥ ५० ॥
ततो विज्ञातमुषलप्रभावा सा मुदावती ।
पस्पर्श मुषलश्रेष्ठमतिनम्रशिरोऽधरा ॥ ५१ ॥
पुनर्यावत् स गृह्णाति मुषलं तं महासुरः ।
तावत् सा वन्दनव्याजात् पस्पर्शानेकशः शुभा ॥ ५२ ॥
ततः स गत्वा युयुधे मुषलेनासुरेश्वरः ।
व्यार्था मुषलपातास्ते संजग्मुस्तेषु शत्रुषु । ५३ ॥
परमास्त्रे तु निर्व्वीर्य्ये सौनन्दे मुषले मुने ।
अस्त्रैः शस्त्रैश्च दैत्येयः सोऽयुध्यत रणेऽरिणा ॥ ५४ ॥
शस्त्रास्त्रैर्न समस्तस्य राजपुत्रस्य सोऽमरः ।
मुषलेन बलन्तस्य तच्च बुद्ध्वा निराकृतं ॥ ५५ ॥

ततः पराजित्य स भूपसूनु-
रस्त्राणि शस्त्राणि च दानवस्य ।

चकार सद्यो विरथं ततश्च
सचर्मखड्गः पुनरप्यधावत् ॥ ५६ ॥
तमापतन्तं रभसाऽभ्युदीर्णं
विस्पष्टकोपं त्रिदशेन्द्रशत्रुं ।
शस्त्रेण वह्नेर्भुवि राजपुत्रो
जघान कालानलसप्रभेन ॥ ५७ ॥
स पावकास्त्रेण हृदि क्षतो भृशं
तत्याज देहं त्रिदशारिरात्मनः ।
बभूव सद्यश्च महोरगाणां
रसातलान्तेषु महानथोत्सवः ॥ ५८ ॥
ततोऽपतत् पुष्पवृष्टिर्महीपालसुतोपरि ।
जगुर्गन्धर्व्वपतयो देववाद्यानि सस्वनुः ॥ ५९ ॥
स चापि राजपुत्रस्तं हत्वा तौ नृपतेः सुतौ ।
मोचयामास तन्वङ्गीं ताञ्च कन्यां मुदावतीं ॥ ६० ।
तच्चापि मुषलं तस्मिन् कुजृम्भे विनिपातिते ।
जग्राह नागाधिपतिरनन्तः शेषसंज्ञितः ॥ ६१ ॥
तस्याश्च परितुष्टोऽसौ शेषः सर्व्वोरगेश्वरः ।
मुदावत्या मुदा ध्यातमनोवृत्तिस्तपोधनः ॥ ६२ ॥
सुनन्दमुषलस्पर्शं यच्चकार पुनः पुनः ।
योषित् करतलस्पर्शप्रभावज्ञातिशोभना ॥ ६३ ॥
मुदावत्यास्ततो नाम नागराजस्तदाकरोत् ।
सुनन्दामिति सानन्दं सौनन्दगुणजं द्विज ॥ ६४ ॥

स चापि राजपुत्रस्तां भ्रातृभ्यां सहितां पितुः ।
समीपमानिनायाशु प्रणिपत्याह चैव तं ॥ ६५ ॥
आनीतौ तनयौ तात तथैवेयं मुदावती ।
तवाज्ञया मयान्यद्यत् कर्त्तव्यं तत्समादिश ॥ ६६ ॥

मार्कण्डेय उवाच ॥

ततः प्रहर्षसम्पूर्णहृदयः स महीपतिः ।
साधु साध्वित्यथाहोच्चैर्वत्स वत्सेति शोभनं ॥ ६७ ॥
सभाजितोऽस्मि त्रिदशैर्वत्साहं कारणैस्त्रिभिः ।
त्वं जामाता च यत्प्राप्तो यच्चारिर्विनिपातितः ॥ ६८ ॥
आगतान्यक्षतान्यच यच्चापत्यानि मे पुनः ।
तन्नृहाणाद्य शस्तेऽह्नि पाणिमस्या मयोदितं ॥ ६९ ॥
त्वं राजपुत्र चार्वङ्ग्याः कन्याया दुहितुर्मम ।
मुदावत्या मुदा युक्तः सत्यवाक्यं कुरुष्व मां ॥ ७० ॥

राजपुत्र उवाच ॥

तातस्याज्ञा मया कार्य्या यद्ब्रवीषि करोमि तत् ।
त्वमेव तात जानीषे नैवाज्ञाविकृता वयं ॥ ७१ ॥

मार्कण्डेय उवाच ॥

ततस्तयोः स राजेन्द्रश्चक्रे वैवाहिकं क्रमं ।
मुदावत्याश्च दुहितुर्भनन्दनसुतस्य वै ॥ ७२ ॥
ततः स ह तया रेमे वत्सप्रीर्नवयौवनः ।
रमणीयेषु देशेषु प्रासादशिखरेषु च ॥ ७३ ॥
कालेन गच्छता वृद्धः पिता तस्य भनन्दनः ।

वनं जगाम वत्सप्रीः स बभूव महीपतिः ॥ ७४ ॥
इयाज यज्ञान् सततं प्रजा धर्म्मेण पालयन् ।
पुत्रवत् पाल्यमानास्तु प्रजास्तेन महात्मना ॥ ७५ ॥
वदृधुर्विषये तस्य न चाभूद्वर्णसङ्करः ।
न दस्युव्यालदुर्वृत्तभयमासीच्च कस्यचित् ॥
नोपसर्गभयञ्चैव तस्मिन् शासति भूपतौ ॥ ७६ ॥

इति श्रीमार्कण्डेयपुराणे भनन्दवत्सप्रीचरितं नाम ॥ ११७ ॥

---

अष्टादशाधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

तस्य तस्यां सुनन्दायां पुत्रा द्वादश जज्ञिरे ।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः ॥ १ ॥
बली बलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ।
स्वरूपश्च महाभागाः सर्व्वे संग्रामजित्तमाः ॥ २ ॥
तेषां ज्येष्ठो महावीर्य्यः प्रांशुरासीन्नराधिपः ।
इतरे भृत्यवत्तस्य बभूवुर्व्वशवर्त्तिनः ॥ ३ ॥
तस्य यज्ञे द्विजत्यक्तैरनेकैर्द्रव्यराशिभिः ।
न्यूनवर्णविसृष्टैश्च सत्यनामा वसुन्धरा ॥ ४ ॥
सम्यक् पालयतस्तस्य प्रजाः पुत्रानिवौरसान् ।
योऽभूद्धनचयः कोषे तेन निष्पादितास्तु ये ॥ ५ ॥

क्रतवः शतसाहस्रास्तेषां संख्या न विद्यते ।
अयुताद्येन कोटीभिर्न च पद्मादिभिर्मुने ॥ ६ ॥
प्रजातिस्तस्य पुत्रोऽभूद्यस्य यज्ञे शतक्रतुः ।
अवाप्य तृप्तिमतुलां यज्ञभागैः सुरैः सह ॥ ७ ॥
दानवानां सुवीर्य्याणां जघान नवतीर्नव ।
बलञ्च बलिनां श्रेष्ठो जम्भञ्चासुरसत्तमं ॥ ८ ॥
अन्यांश्च सुमहावीर्य्यानाजघानामरद्विषः ।
प्रजातेस्तनयाः पञ्च खनित्रप्रमुखा मुने ॥ ९ ॥
तेषां खनित्रो राजाभूत् प्रख्यातो निजविक्रमैः ।
स शान्तः सत्यवाक् शूरः सर्व्वप्राणिहिते रतः ॥ १० ॥
स्वधर्माभिरतो नित्यं वृद्धसेवी बहुश्रुतः ।
वाग्मी विनयसम्पन्नः कृतास्त्रोऽप्यविकत्थनः ॥ ११ ॥
सर्व्वलोकप्रियो नित्यमुवाचैतदहर्निशं ।
नन्दन्तु सर्व्वभूतानि स्निह्यन्तु विजनेष्वपि ॥ १२ ॥
स्वस्त्यस्तु सर्व्वभूतेषु निरातङ्कानि सन्तु च ।
मा व्याधिरस्तु भूतानामाधयो न भवन्तु च ॥ १३ ॥
मैत्रीमशेषभूतानि पुष्यन्तु सकले जने ।
शिवमस्तु द्विजातीनां प्रीतिरस्तु परस्परं ॥ १४ ॥
समृद्धिः सर्व्ववर्णानां सिद्धिरस्तु च कर्मणां ।
ते लोकाः सर्व्वभूतेषु शिवा वोऽस्तु सदा मतिः ॥ १५ ॥
यथात्मनि तथा पुत्रे हितमिच्छथ सर्वदा ।
तथा समस्तभूतेषु वर्त्तध्वं हितबुद्धयः ॥ १६ ॥

एतद्वो हितमत्यन्तं को वा कस्यापराध्यते ।
यत् करोत्यहितं किञ्चित् कस्यचिन्मूढमानसः ॥ १७ ॥
तं समभ्येति तन्नूनं कर्तृगामि फलं यतः ।
इति मत्वा समस्तेषु भो लोकाः कृतबुद्धयः ॥ १८ ॥
सन्तु मा लौकिकं पापं लोकाः प्राप्स्यथ वै बुधाः ।
यो मेऽद्य स्निह्यते तस्य शिवमस्तु सदा भुवि ॥ १९ ॥
यश्च मां द्वेष्टि लोकेऽस्मिन् सोऽपि भद्राणि पश्यतु ।
एवंस्वरूपः पुत्रोऽभूत् खनित्रस्तस्य भूपतेः ॥ २० ॥
समस्तगुणसम्पन्नः श्रीमानब्जदलेक्षणः ।
तेन ते भ्रातरः प्रीत्या पृथग्राज्येषु योजिताः ॥ २१ ॥
स्वयञ्च पृथिवीमेतां बुभुजे सागराम्बरां ।
प्राच्यां तेन कृतः शौरिर्दक्षिणायां मुदावसुः ॥ २२ ॥
दिशि प्रतीच्यां सुनय उत्तरस्यां महारथः ।
तेषां तस्य च भूपस्य पृथग्गोत्राः पुरोहिताः ॥ २३ ॥
बभूवुर्मुनयश्चैव मन्त्रिवंशक्रमागताः ।
शौरेरत्रिकुलोद्भूतः सुहोत्रो नाम वै द्विजाः ॥ २४ ॥
उदावसोः कुशावर्त्तो गौतमान्वयजोऽभवत् ।
काश्यपः प्रमतिर्नाम सुनयस्य पुरोहितः ॥ २५ ॥
महारथस्य वाशिष्ठः पुरोधाऽभून्महीभृतः ।
बुभुजुस्ते स्वराज्यानि चत्वारोऽपि नराधिपाः ॥ २६ ॥
खनित्रश्चाधिपस्तेषामशेषवसुधाधिपः ।
तेषु भ्रातृष्वशेषेषु खनित्रः स महीपतिः ॥ २७ ॥

प्रजासु च समस्तासु पुत्त्रेष्विव सदा हितः ।
एकदा मन्त्रिणा शौरिः स प्रोक्तो विश्ववेदिना ॥ २८ ॥
विविक्ते पृथिवीपाल किञ्चिद्वक्तव्यमस्ति नः ।
यस्येयं पृथिवी कृत्स्ना यस्य भूपा वशानुगाः ॥ २९ ॥
स राजा तस्य पुत्त्रश्च तत्पौत्त्राश्चान्वयस्ततः ।
इतरे भ्रातरस्तस्य प्राक्कल्पविषयाधिपाः ॥ ३० ॥
तत्पुत्त्रश्चाल्पकस्तस्मात् तत्पौत्त्राश्चाल्पकल्पिकाः ।
कालेन ह्रासमासाद्य पुरुषात् पुरुषान्तरं ॥ ३१ ॥
कृष्योपजीविनो भूप भवन्तीति तदन्वयाः ।
नोद्धारं कुरुते भ्राता भ्रातृस्नेहबलार्पणः ॥ ३२ ॥
स्नेहकः पृथिवीपाल परयोर्भ्रातृपुत्त्रयोः ।
तत्पुत्त्रयोः परतरा मतिर्भवति पार्थिव ॥ ३३ ॥
तत्पुत्त्रः केन कार्य्येण प्रीतियुक्तो भविष्यति ।
अथवा येन तेनैव सन्तोषं कुरुते नृपः ॥ ३४ ॥
क्रियते तत् किमर्थन्तु भूपैर्मन्त्रपरिग्रहः ।
भुज्यते सकलं राज्यं मया ते मन्त्रिणा सता ॥ ३५ ॥
तत् किं सुखाधारयसे सन्तोषं कुरुते यदि ।
कार्य्यनिष्पादकं राज्यं करणं कर्त्तुरिष्यते ॥ ३६ ॥
राज्यलब्धुश्च ते कार्य्यं त्वं कर्त्ता करणं वयं ।
सोऽस्माभिः करणै राज्यं पितृपैतामहं कुरु ॥
फलप्रदा भविष्यामः परलोके न ते वयं ॥ ३७ ॥

राजोवाच ॥

ज्येष्ठो राजा महीपाल वयन्तस्यानुजा यतः ।
ततः स भुंक्ते पृथिवीं वयञ्चाल्पवसुन्धरां ॥ ३८ ॥
वयन्तु भ्रातरः पञ्च पृथ्वी चैका महामते ।
अतोऽस्याः पृथगैश्वर्य्यं कथं कृत्स्नं भविष्यति ॥ ३९ ॥

विश्ववेद्युवाच ॥

एवमेतद्भवांस्तत्र यद्येका वसुधा नृप ।
तां त्वमेवाभिपद्यस्व ज्येष्ठः शास्तु महीं भवान् ॥ ४० ॥
सर्व्वाधिपत्यः सर्वेभ्यो भव त्वमखिलेश्वरः ।
यतन्ते च यथाऽहन्ते तेषामाहितमन्त्रिणः ॥ ४१ ॥

राजोवाच ॥

ज्येष्ठो राजा यथा प्रीत्या भजतेऽस्मान् सुतानिव ।
कथं तस्य करिष्यामि ममत्वं जगतीगतं ॥ ४२ ॥

विश्ववेद्युवाच ॥

राज्यस्थितः पूजयेथा ज्येष्ठो भूपार्हगौर्नवैः ।
कनिष्ठज्येष्ठता केयं राज्यं प्रार्थयतां नृणां ॥ ४३ ॥

मार्कण्डेय उवाच ॥

तथेति च प्रतिज्ञाते भूभुजा तेन सत्तम ।
विश्ववेदी ततो मन्त्री तद्भ्रातॄननयद्वशं ॥ ४४ ॥
तेषां पुरोहितांश्चैव आत्मनः शान्तिकादिषु ।
नियोजयामास ततः खनित्रस्याभिचारके ॥ ४५ ॥
बिभेद तस्य निभृतान् सामदानादिभिस्तथा ।

चक्रे च परमोद्योगं निजदण्डप्रबाधने ॥ ४६ ॥
आभिचारिकमत्युग्रमहन्यहनि कुर्वतां ।
पुरोधसां चतुर्णाञ्च जज्ञे कृत्याचतुष्टयं ॥ ४७ ॥
विकरालं महावक्त्रमतिभीषणदर्शनं ।
समुद्यतमहाशूलं प्रभूतमतिदारुणं ॥ ४८ ॥
ततस्तदागतन्तत्र खनित्रो यत्र पार्थिवः ।
निरस्तञ्चाप्यदुष्टस्य तस्य पुण्यचयेन तत् ॥ ४९ ॥
कृत्याचतुष्टयन्तेषु निपपात दुरात्मसु ।
पुरोहितेषु भूपानां तथा वै विश्ववेदिनि ॥ ५० ॥
ततो निहन्त्या निर्दग्धाः कृत्यया ते पुरोहिताः ।
विश्ववेदी तथा मन्त्री स शौरेर्दुष्टमन्त्रदः ॥ ५१ ॥

इति श्रीमार्कण्डेयपुराणे खनित्रचरित्रे ॥ ११८ ॥

---

## ऊनविंशत्यधिक शततमोऽध्यायः ॥

### मार्कण्डेय उवाच ॥

ततः समस्तलोकस्य विस्मयः सोऽभवन्महान् ।
यदेककालं नेशुस्ते पृथक्पुरनिवासिनः ॥ १ ॥
ततः शुश्राव निधनं यातान् भ्रातृपुरोहितान् ।
मन्त्रिणञ्च तथा भ्रातुर्दग्धं तं विश्ववेदिनं ॥ २ ॥
किमेतदिति सोऽतीव विस्मितो मुनिसत्तम ।
खनित्रोऽभून्महाराजो नाजानात् तच्च कारणं ॥ ३ ॥

ततो वशिष्ठं पप्रच्छ स राजा गृहमागतं ।
यत्कारणं विनेशुस्ते भ्रातृमन्त्रिपुरोहिताः ॥ ४ ॥
तन पृष्टस्तदा प्राह यथा वृत्तं महामुनिः ।
यच्छौरिमन्त्रिणा प्रोक्तं यच्च शौरिरुवाच तं ॥ ५ ॥
यथा चानुष्ठितन्तेन भ्रातॄणां भेदकारि वै ।
मन्त्रिणा तेन दुष्टेन यच्चक्रुश्च पुरोहिताः ॥ ६ ॥
यन्निमित्तं विनेशुस्ते अपापस्यापकारिणः ।
पुरोहितास्तस्य राज्ञः शत्रावपि दयापराः ॥ ७ ॥
स तच्छ्रुत्वा ततो राजा हा हतोऽस्मीति वै वदन् ।
निनिन्दात्मानमत्यर्थं वशिष्ठस्याग्रतो द्विज ॥ ८ ॥

राजोवाच ॥

धिङ्मामपुण्यसंस्थानमल्पभाग्यमशोभनं ।
दैवदोपकृतं पापं सर्व्वलोकविगर्हितं ॥ ९ ॥
तन्निमित्तं विनष्टं यत्तद्ब्राह्मणचतुष्टयं ।
मत्तः कोऽन्यः पापतरो भविष्यति पुमान् भुवि ॥ १० ॥
नाभविष्यं यदि पुमानहमत्र महीतले ।
ततस्ते न विनश्येयुर्मम भ्रातृपुरोहिताः ॥ ११ ॥
धिग्राज्यं धिक् च मे जन्म भूभुजां महतां कुले ।
कारणत्वं गतो योऽहंविनाशस्य द्विजन्मनां ॥ १२ ॥
कुर्वन्तः स्वामिनां तेऽर्थं भ्रातॄणां मम याजकाः ।
नाशं ययुर्नदुष्टास्ते दुष्टोऽहं नाशकारणे ॥ १३ ॥
किं करोमि क्व गच्छामि नान्यो मत्तो हि पापकृत् ।

पृथिव्यामस्ति हेतुत्वं द्विजनाशस्य यो गतः ॥ १४ ॥
इत्थमुद्विग्नहृदयः खनित्रः पृथिवीपतिः ।
वनं यियासुः पुत्रस्य कृतवानभिषेचनं ॥ १५ ॥
अभिषिच्य सुतं राजेन्द्र क्षुपसंज्ञं महीपतिः ।
भार्य्याभिस्तिसृभिः सार्द्धं तपसे स वनं ययौ ॥ १६ ॥
तत्र गत्वा तपस्तेपे वानप्रस्थविधानवित् ।
शतानि त्रीणि वर्षाणां सार्द्धानि नृपसत्तमः ॥ १७ ॥
तपसा क्षीणदेहस्तु राजवर्य्यो द्विजोत्तम ।
निगृह्य सर्वस्रोतांसि तत्याजासून् वनेचरः ॥ १८ ॥
ततः पुण्यान् ययौ लोकान् सर्वकामदुहोऽक्षयान् ।
अश्वमेधादिभिर्यज्ञैरवाप्या ये नराधिपैः ॥ १९ ॥
भार्य्याश्च तस्य तास्तिस्रः समन्तेनैव तत्यजुः ।
प्राणान् वापुः समालोक्यं तेनैव सुमहात्मना ॥ २० ॥
एतत् खनित्रचरितं श्रुतं कल्मषनाशनं ।
पठताञ्च महाभाग क्षुपस्यातो निशामय ॥ २१ ॥

इति श्रीमार्कण्डेयपुराणे खनित्रचरितं समाप्तं ॥ ११९ ॥

---

## विंशत्यधिक शततमोऽध्यायः ॥

### मार्कण्डेय उवाच ॥

क्षुपः खनित्रपुत्रस्तु प्राप्य राज्यं यथा पिता ।
तथैव पालयामास प्रजा धर्मेण रञ्जयन् ॥ १ ॥

स दानशीलो यष्टा च यज्ञानामवनीपतिः।
समः शत्रौ च मित्रे च व्यवहारादिवर्त्मनि॥ २॥
एकदा स महीपालो निजस्थानगतो मुने।
सूतैरुक्तो यथा पूर्व्वं नृपो राजा तथाऽभवत्॥ ३॥
ब्रह्मणस्तनयः पूर्व्वं नृपोऽभूत् पृथिवीपतिः।
यादृक् चरितमस्यासीत्तादृक् तस्यैव चेष्टितं॥ ४॥

राजोवाच॥

श्रोतुमिच्छामि चरितं क्षुपस्य सुमहात्मनः।
यदि तादृङ्मया शक्यं चेष्टितुं तत्करोम्यहं॥ ५॥

सूता ऊचुः॥

स चकाराकरान् भूप राजा गोब्राह्मणान् पुरा।
षष्ठांशेन कृता चोर्व्वीमिष्टिस्तेन महात्मना॥ ६॥

राजोवाच॥

तेषां महात्मनां राज्ञां कोऽनुयास्यति मद्विधः।
तथाप्युत्कृष्टचेष्टानां चेष्टासूद्यमवान् भवेत्॥ ७॥
तत् श्रूयतां प्रतिज्ञा या साम्प्रतं क्रियते मया।
क्षुपस्यानुकरिष्यामि महाराजस्य चेष्टितं॥ ८॥
त्रींस्त्रीन् यज्ञान् करिष्यामि शस्यापाते गतागते।
पृथिव्याश्चतुरर्णायां प्रतिज्ञेयं कृता मया॥ ९॥
यच्च गोब्राह्मणाः पूर्व्वमददन् भूभृते करं।
तमेव प्रतिदास्यामि ब्राह्मणानां तथा गवां॥ १०॥

मार्कण्डेय उवाच ॥

इति प्रतिज्ञाय वचः क्षुपस्तत्कृतवांस्तथा ।
शस्यापाते स यज्ञांस्त्रीनयजद्यजतां वरः ॥ ११ ॥
गोब्राह्मणाः पुरा राज्ञामदद्यञ्च वै करं ।
तावत्संख्यमदाद्वित्तमन्यद्गोब्राह्मणाय सः ॥ १२ ॥
तस्य पुत्रोऽभवद्वीरः प्रमथायामनिन्दितः ।
यस्य प्रतापशौर्य्याभ्यां कृता वश्या महीभृतः ॥ १३ ॥
तस्यापि नन्दिनी नाम वैदर्भी दयिताऽभवत् ।
विविंशं तनयं तस्यां जनयामास स प्रभुः ॥ १४ ॥
विविंशे शासति मह्यीं महीपाले महौजसि ।
महीतलमभूद्व्याप्तं निरन्तरतया नरैः ॥ १५ ॥
ववर्ष काले पर्जन्यो मही शस्यवती तथा ।
सुफलानि च शस्यानि रसवन्ति फलानि च ॥ १६ ॥
रसाः पुष्टिकराश्चासन् पुष्टिर्नोन्मादकारिणी ।
न वित्तनिचया नृणां प्रभूता मदहेतवः ॥ १७ ॥
तत्प्रतापेन रिपवो भयमापुर्महामने ।
स्वास्थ्यं जनः सुहृद्वर्गो मुदमिच्छन्ति पौरिकाः ॥ १८ ॥
इष्ट्वा स यज्ञान् सुबहून् सम्यक् सम्पाल्य मेदिनीं ।
संग्रामे निधनं प्राप्य शक्रलोकमितो गतः ॥ १९ ॥

इति श्रीमार्कण्डेयपुराणे विविंशचरितं समाप्तं ॥ १२० ॥

एकविंशत्यधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

तस्य पुत्रः खनीनेत्रो महाबलपराक्रमः ।
यस्य यज्ञेष्वगायन्त गन्धर्व्वा विस्मयान्विताः ॥ १ ॥
खनीनेत्रसमो नान्यो भुवि यज्वा भविष्यति ।
तेन यज्ञायुते पूर्णे दत्ता पृथ्वी ससागरा ॥ २ ॥
दत्त्वा च सकलां पृथ्वीं ब्राह्मणानां महात्मनां ।
तपसा द्रव्यमासाद्य मोचयेत् साधितेन यः ॥ ३ ॥
यतश्च प्राप्य वित्तर्द्धिमतुलां दातृसत्तमात् ।
जगृहुर्ब्राह्मणा विप्र नान्यराज्ञः प्रतिग्रहं ॥ ४ ॥
सप्तषष्टिसहस्राणि सप्तषष्टिशतानि च ।
सप्तषष्टिञ्च यो यज्ञानयजद्भूरिदक्षिणान् ॥ ५ ॥
अपुत्रः स महोपालो मृगयामुपचक्रमे ।
पुत्रार्थं पितृयज्ञाय मांसकामो महामुने ॥ ६ ॥
अश्वारूढो विना सैन्यमेक एव महावने ।
बद्धगोधाङ्गुलित्राणो बाणखड्गधनुर्धरः ॥ ७ ॥
तं वाहयन्तं तुरगमन्यतो गहनाद्वनात् ।
विनिष्क्रम्य मृगः प्राह मां हत्वाभिमतं कुरु ॥ ८ ॥

राजोवाच ॥

अन्ये मृगाः पलायन्ते महाभीत्या विलोक्य मां ।
कथमात्मप्रदानं त्वं मृत्यवे कर्त्तुमिच्छसि ॥ ९ ॥

मृग उवाच ॥

अपुत्रोऽहं महाराज वृथा जन्मप्रयोजनं ।
विचारयन्न पश्यामि प्राणानामिह धारणं ॥ १० ॥

मार्कण्डेय उवाच ॥

अथाभ्येत्य मृगः प्राह तमन्यो वसुधाधिपं ।
मृगस्य तस्य प्रत्यक्षमलमेतेन पार्थिव ॥ ११ ॥
घातयस्वेति मां मांसैर्मम कर्म समाचर ।
यथा कृतार्थता ते स्यान्मम चाप्युपकारि तत् ॥ १२ ॥
पुत्रार्थं त्वं महाराज स्वपितॄन् यष्टुमिच्छसि ।
अपुत्रस्यास्य मांसेन लप्स्यसे वाञ्छितं कथं ॥ १३ ॥
यादृक् कर्म विनिष्पाद्यं तादृक् द्रव्यमुपाहरेत् ।
दुर्गन्धैर्न सुगन्धानां गन्धज्ञानविनिर्णयः ॥ १४ ॥

राजोवाच ॥

वैराग्यकारणं प्रोक्तमनेनापुत्रता मम ।
कथ्यतां प्राणसंत्यागे यत्ते वैराग्यकारणं ॥ १५ ॥

मृग उवाच ॥

बहवो मे सुता भूप बह्व्यो दुहितरस्तथा ।
यच्चिन्तादुःखदावाग्निज्वालामध्ये वसाम्यहं ॥ १६ ॥
सर्व्वसाध्या नरेन्द्रेयं मृगजातिः सुकातरा ।
तेष्वपत्येषु मे चाति ममत्वं तेन दुःखितः ॥ १७ ॥
मनुष्यसिंहशार्दूलवृकादिभ्यो बिभेम्यहं ।
न हीनात् सर्व्वसत्त्वेभ्यः श्वशृगालादपि प्रभो ॥ १८ ॥

सोऽहं निमित्तं बन्धूनामिमां शून्यां वसुन्धरां ।
नृसिंहादिभयात् सर्व्वामिच्छामि सुभृशं सकृत् ॥ १९ ॥
तृणान्यन्येऽपि खादन्ति गोऽजावितुरगादिकाः ।
तांस्तेषां पोषणायाहमिच्छामि निधनं गतान् ॥ २० ॥
निष्क्रान्तेषु ततस्तेषु ममापत्येषु वै पृथक् ।
भवन्ति चिन्ताः शतशो ममत्वाहृतचेतसः ॥ २१ ॥
किङ्कूटपाशं किं वज्रं वागुरां किं सुतो मम ।
प्राप्तश्चरन् वने किं वा नृसिंहादिवशं गतः ॥ २२ ॥
प्राप्तोऽयमेकः संप्राप्तास्तेऽवस्थां कीदृशीं मम ।
साम्प्रतं विचरन्तो वै ये गताः सुमहावनं ॥ २३ ॥
दृष्ट्वा प्राप्तसमाभ्यासमहन्तानात्मजान्नृप ।
ईषदुच्छ्वसितः क्षेममिच्छामि रजनीं पुनः ॥ २४ ॥
प्रभाते दिवसं क्षेममस्तगेऽर्के निशामपि ।
वाञ्छाम्यहं कदा क्षेमं सर्व्वकालं भविष्यति ॥ २५ ॥
एतत्ते कथितं भूप ममोद्वेगस्य कारणं ।
अतः प्रसादं कुरु मे बाणोऽयं पात्यतां मयि ॥ २६ ॥
इति दुःखशताविष्टः प्राणानपि त्यजामि यत् ।
तत्कारणं निबोध त्वं ब्रुवतो मम पार्थिव ॥ २७ ॥
असूर्य्या नाम ते लोका यान् गच्छन्त्यात्मघातकाः ।
यज्ञोपयुक्ताः पशवः संप्रयान्त्युच्छ्रितीः प्रभो ॥ २८ ॥
अग्निः पशुरभूत् पूर्व्वं पशुराशीज्जलाधिपः ।
भास्मानथोच्छ्रितीः प्राप्तो यज्ञे निष्ठामुपागतः ॥ २९ ॥

तन्ममैतां कृपां कृत्वा नय मामुच्छ्रितिं नृप ।
आत्मनश्चेप्सितं कामं पुत्रलाभादवाप्स्यसि ॥ ३० ॥

पूर्व्वमृग उवाच ॥

राजेन्द्र नैष हन्तव्यो धन्योऽयं सुकृती मृगः ।
बहवस्तनया यस्य हन्तव्योऽहमसन्ततिः ॥ ३१ ॥

उत्तरमृग उवाच ॥

एकदेहभवं यस्य दुःखं धन्यः स वै भवान् ।
बहूनि यस्य देहानि तस्य दुःखान्यनेकधा ॥ ३२ ॥
एको यदाहमासन्तु प्राक् तदा देहजं मम ।
दुःखमासीन्ममत्वे तु भार्य्यायास्तदभूद्द्विधा ॥ ३३ ॥
यदा जातान्यपत्यानि तदा यावन्ति तानि वै ।
तावच्छरीरभूमीनि मम दुःखान्यथाभवन् ॥ ३४ ॥
न कृतार्थो भवान् यस्य नातिदुःखाय सम्भवः ।
इह दुःखाय मत्सूतिः परत्र च विरोधिनी ॥ ३५ ॥
यतो रक्षणपोषार्थमपत्यानां करोमि तत् ।
चिन्तयामि च संभूतिस्तेन मे नरके ध्रुवा ॥ ३६ ॥

राजोवाच ॥

न वेद्मि किं सन्ततिमान् धन्योऽपुत्रोऽत्र किं मृग ।
पुत्रार्थश्चायमारम्भो मम दोलायते मनः ॥ ३७ ॥
दुःखाय सन्ततिः सत्यमैहिकामुष्मिकाय तत् ।
तथाप्यतनयान् यान्ति ऋणानीति श्रुतं मया ॥ ३८ ॥

सोऽहं यातिष्ये पुत्त्रार्थमृते प्राणिवधं मृग ।
तपसैव प्रचण्डेन यथा पूर्व्वं महीपतिः ॥ ३९ ॥

इति श्रीमार्कण्डेयपुराणे खनीनेत्रचरितं नाम ॥ १२१ ॥

---

## द्वाविंशत्यधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततः स नृपतिर्गत्वा गोमतीं पापनाशिनीं ।
तत्र तुष्टाव नियतो भूत्वा देवं पुरन्दरं ॥ १ ॥
तप्यमानस्तपश्चोग्रं यतवाक्कायमानसः ।
तुष्टाव प्रयतः शक्रमपत्यार्थं महीपतिः ॥ २ ॥
तस्य स्तोत्रेण तपसा भक्त्या चापि सुरेश्वरः ।
तुतोष भगवानिन्द्रः प्राह चैनं महामुने ॥ ३ ॥
अनेन तपसा भक्त्या स्तोत्रेणोच्चारितेन च ।
परितुष्टोऽस्मि ते भूप व्रियतां भवता वरः ॥ ४ ॥

राजोवाच ॥

अपुत्त्रस्य सुतो मेऽस्तु सर्व्वशस्त्रभृतां वरः ।
सदा चाभ्याहतैश्वर्य्यो धर्मकृद्धर्मवित् कृती ॥ ५ ॥

मार्कण्डेय उवाच ॥

तथेति चोक्तः शक्रेण राजा प्राप्तमनोरथः ।
प्रजाः पालयितुं भूप आजगाम निजं पुरं ॥ ६ ॥

तच्चास्य कुर्व्वतो यत्नं सम्यक् पालयतः प्रजाः ।
अजायत सुतो विप्र तदा शक्रप्रसादतः ॥ ७ ॥
तस्य नाम पिता चक्रे बलाश्व इति भूपतिः ।
अस्त्रग्राममशेषञ्च ग्राहयामास तं सुतं ॥ ८ ॥
पितर्य्युपरते विप्र सोऽधिराज्ये स्थितो नृपः ।
स बलाश्वो वशं निन्ये भुवि सर्व्वमहीक्षितः ॥ ९ ॥
करञ्च दापयामास सारग्रहणपूर्व्वकं ।
स सर्व्वभूमिपान् राजा पालयामास च प्रजाः ॥ १० ॥
अथाखिलनरेन्द्रास्ते दायादास्तस्य दुर्मदाः ।
न चाभ्युत्थाय सततं ते चास्मै प्रददुः करान् ॥ ११ ॥
व्युत्थिताः स्वेषु राष्ट्रेषु न सन्तोषपरास्ततः ।
भूवं तस्य नरेन्द्रस्य जगृहुस्ते नराधिपाः ॥ १२ ॥
स गृहीत्वा स्वकं राज्यं पृथिवीशे बलान्मुने ।
तस्थौ स्वनगरे भूपैर्व्विरोधी बहुभिः कृतः ॥ १३ ॥
समेत्य सुमहावीर्य्याः ससाधनधनास्ततः ।
रुरुधुस्तं महीपालं पुरे तत्र नरेश्वराः ॥ १४ ॥
पुररोधेन तेनाथ कुपितः स महीपतिः ।
स्वल्पकोषोऽल्पदण्डश्च वैक्लव्यं परमं गतः ॥ १५ ॥
अपश्यमानः शरणं सबलो द्विजसत्तम ।
करौ मुखाग्रतः कृत्वा निशश्वासार्त्तमानसः ॥ १६ ॥
ततोऽस्य हस्तविरवान्मुखानिलसमाहताः ।
निजग्मुः शतशो योधा रथनागतुरङ्गमाः ॥ १७ ॥

ततः क्षणेन तत्सर्व्वं नगरं तस्य भूपतेः ।
व्याप्तमासीद्बलौघेन सारेणातिबलान्मुने ॥ १८ ॥
अथ सोऽतिबलौघेन महता तेन संवृतः ।
निर्गम्य नगरात्तस्मात्तान् विजिग्ये नराधिपः ॥ १९ ॥
जित्वा च वशमानीय चकार करदान् पुनः ।
यथा पूर्व्वं महाभाग महाभाग्यो नरेश्वरः ॥ २० ॥
धुतयोः करयोर्जज्ञे यतस्तस्यारिदाहदं ।
बलं करन्धमस्तस्मात् स बलाश्वोऽभिधीयते ॥ २१ ॥
स धर्मात्मा महात्मा च स मैत्रः सर्व्वजन्तुषु ।
करन्धमोऽभवद्भूपस्त्रिषु लोकेषु विश्रुतः ॥ २२ ॥
सम्प्राप्तस्य परामार्त्तिं ददावरिविनाशनं ।
बलन्धर्म्मेण चाक्षिप्तमभ्युपेत्य स्वयं नृपः ॥ २३ ॥

इति श्रीमार्कण्डेयपुराणे करन्धमचरितं समाप्तं ॥ १२२ ॥

---

## त्रयोविंशत्यधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

वीर्य्यचन्द्रसुता सुभ्रुर्व्वीरा नाम शुभव्रता ।
स्वयम्वरे सा जगृहे महाराजं करन्धमं ॥ १ ॥
तस्यां पुत्रं स राजेन्द्रो जनयामास वीर्य्यवान् ।
अवीक्षितमिति ख्यातिमुपेतं जगतीतले ॥ २ ॥

जाते तस्मिन् सुते राजा स दैवज्ञानपृच्छत ।
कच्चित् प्रशस्तनक्षत्रे शस्तलग्ने सुतो मम ॥ ३ ॥
कच्चिच्चालोकितं जन्म मम पुत्रस्य शोभनैः ।
ग्रहैः कच्चिन्न दुष्टानां ग्रहाणां दृक्पथं गतं ॥ ४ ॥
इत्युक्तास्तेन दैवज्ञास्तमूचुर्न्नृपतिं ततः ।
शस्ते मुहूर्त्ते नक्षत्रे लग्ने चैव सुतस्तव ॥ ५ ॥
समुत्पन्नो महावीर्य्यो महाभागो महाबलः ।
भविष्यति महाराज महाराजस्तवात्मजः ॥ ६ ॥
अवैक्षतेमं देवानां गुरुः शुक्रश्च सप्तमः ।
सोमश्चतुर्थस्तनयं तवैनं समवैक्षत ॥ ७ ॥
उपान्तसंस्थितश्चैव सोमपुत्रोऽप्यरक्षत ।
नावैक्षतेमं सविता न भौमो न शनैश्चरः ॥ ८ ॥
तव पुत्रं महाराज धन्योऽयं तनयस्तव ।
सर्व्वकल्याणसम्पत्तिं समवेतो भविष्यति ॥ ९ ॥

मार्कण्डेय उवाच ॥

इति दैवज्ञवचनं निशम्य वसुधाधिपः ।
हर्षपूर्णमनाः प्राह निजस्थानगतस्तदा ॥ १० ॥
अवैक्षतेमं देवानां गुरुः सोमसुतो बुधः ।
नावैक्षतैनमादित्यो नार्कसूनुर्न भूमिजः ॥ ११ ॥
अवैक्षतेति यत्प्रोक्तं भवद्भिर्बहुशो वचः ।
अवीक्षितेति तेनास्य ख्यातं नाम भविष्यति ॥ १२ ॥

मार्कण्डेय उवाच ॥

अवीक्षितः सुतस्तस्य वेदवेदाङ्गपारगः ।
अस्त्रग्राममशेषं स कण्वपुत्रादथाग्रहीत् ॥ १३ ॥
स रूपेणाति भिषजौ देवानां पार्थिवात्मजः ।
बुद्ध्या वाचस्पतिं कान्त्या शशाङ्कं तेजसा रविं ॥ १४ ॥
धैर्य्येणाब्धिं तथोर्व्वीञ्च सहिष्णुत्वेन वीर्य्यवान् ।
शौर्य्येण न समस्तस्य कश्चिदासीन्महात्मनः ॥ १५ ॥
स्वयम्वरे तं जगृहे हेमधर्मात्मजा वरा ।
सुदेवतनया गौरी सुभद्रा बलिनः सुता ॥ १६ ॥
लीलावती वीरसुता वीरभद्रसुतानिभा ।
भीमात्मजा मान्यवती दम्भपुत्री कुमुद्वती ॥ १७ ॥
याश्चैवन्नाभिनन्दन्ति स्वयम्वरकृतक्षणाः ।
ताश्चापि स बलाद्वीरो जग्राह नृपतेः सुतः ॥ १८ ॥
निराकृत्य नृपान् सर्व्वांस्तासां पितृकुलानि च ।
स्वकं हि वीर्य्यमाश्रित्य बलवान् स बलोद्धतः ॥ १९ ॥
एकदा तु विशालस्य वैदिशाधिपतेः सुतां ।
वैशालिनीं स सुदतीं स्वयम्वरकृतक्षणां ॥ २० ॥
परिभूयाखिलान् भूपान् स्वेच्छया न वृतस्तया ।
बलाज्जग्राह विप्रर्षे यथान्या बलगर्व्वितः ॥ २१ ॥
ततस्ते भूभृतः सर्व्वे बहुशस्तेन मानिना ।
निराकृताः सुनिर्व्विण्णा प्रोचुरन्योन्यमाकुलाः ॥ २२ ॥
क्षमतां ललनामेतामेकस्माद्बलशालिनां ।

बहूनामेकवर्णानां जन्म धिग्वो महीभृतां ॥ २३ ॥
क्षत्रियो यः क्षतत्राणं वध्यमानस्य दुर्मदैः ।
करोति तस्य तन्नाम वृथैवान्ये हि बिभ्रति ॥ २४ ॥
आत्मनोऽपि क्षतत्राणं दुष्टादस्मादकुर्व्वतां ।
भवतां क्षत्रियकुले जातानां कीदृशी मतिः ॥ २५ ॥
उच्चार्य्यते स्तुतिर्या च सूतमागधवन्दिभिः ।
सा सत्या मा वृथा वीरा भवत्वरिविनाशनात् ॥ २६ ॥
चरतां सा वृथैवैष भूपश्चारैर्दिगन्तरैः ।
पौरुषाश्रयिणः सर्व्वे विशिष्टकुलसम्भवाः ॥ २७ ॥
बिभेति को न मरणात् को युद्धेन विनाऽमरः ।
विचिन्त्यैतन्न हातव्यं पौरुषं शस्त्रवृत्तिभिः ॥ २८ ॥
एतन्निशम्य ते भूपा विस्पष्टामर्षपूरिताः ।
ऊचुः परस्परं सर्व्वे समुत्तस्थुश्च सायुधाः ॥ २९ ॥
केचिद्रथानारुरुहुः केचिन्नागांस्तथा हयान् ।
अन्येऽमर्षपराधीनास्तमुपेताः पदातयः ॥ ३० ॥

इति श्रीमार्कण्डेयपुराणेऽवीक्षितचरिते ॥ १२३ ॥

चतुर्विंशत्यधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

इति संग्रामसज्जास्ते भूपा भूपसुतास्तथा ।
निराकृताः सुबहुशस्तत्कालञ्चाप्यवीक्षिताः ॥ १ ॥

ततो बभूव संग्रामस्तस्य तैः सह दारुणः ।
एकस्य बहुभिर्भूपैर्भूपपुत्त्रवरैर्मुने ॥ २ ॥
तेऽसिशक्तिगदाबाणपाणयस्तं सुदुर्मदाः ।
अभिघ्नन्तो युयुधिरे तैः समस्तैरसावपि ॥ ३ ॥
स तान् शरशतैरुग्रैर्बिभेद नृपनन्दनः ।
क्षतास्त्रो बलवान् बाणैस्ते च तं विभिदुः शितैः ॥ ४ ॥
कस्यचिच्चिच्छिदे बाहुमन्यस्य च शिरोधरं ।
हृदि विव्याध चैवान्यमन्यं वक्षस्यताडयत् ॥ ५ ॥
करञ्चिच्छेद करिणस्तुरगस्य तथा शिरः ।
तथान्येषान्तथैवाश्वान्रथस्यान्यस्य सारथिं ॥ ६ ॥
बाणानापततश्चक्रे द्विधा बाणैस्तथा द्विषां ।
चिच्छेदान्यस्य खङ्गञ्च धनुरन्यस्य लाघवात् ॥ ७ ॥
तनुत्रेऽपहृते तेन ननाशान्यो नृपात्मजः ।
अवीक्षिताहतश्चान्यः पदातिः प्रजहौ रणं ॥ ८ ॥
इत्याकुलीकृते तस्मिन् समग्रे राजमण्डले ।
तस्थुः सप्तशता वीरा मरणे कृतनिश्चयाः ॥ ९ ॥
आभिजात्यवयःशौर्य्यवीर्य्यलज्जासमन्विताः ।
निर्ज्जिते सकले सैन्ये पलायनपरायणे ॥ १० ॥
तैः समेत्य महीपालैः स तु पुत्त्रो महीक्षितः ।
युयुधे धर्मयुद्धेन तेन तेनातिकोपितः ॥ ११ ॥
विच्छिन्नयन्त्रकवचान् स तानपि महाबलः ।
कर्त्तुं व्यवस्थितस्ते च ततः क्रुद्धा महामुने ॥ १२ ॥

धर्ममुत्सृज्य युयुधुर्युध्यमानेन धर्मतः ।
नरेन्द्रपुत्राः प्रस्वेदजलक्लिन्नाननाः समं ॥ १३ ॥
विव्याध कश्चिद्बाणौघैः कश्चिच्चिच्छेद कार्मुकं ।
ध्वजमस्यापरो बाणैश्छित्त्वा भूमावपातयत् ॥ १४ ॥
जघ्नुरन्ये तथैवाश्वान् बभञ्जुश्चापरे रथं ।
गदापातेनाथवान्ये बाणैः पृष्ठमताडयत् ॥ १५ ॥
छिन्ने धनुषि सक्रोधः स तदा नृपतेः सुतः ।
जग्राहासिं तथा चर्म तदप्यन्येन पातयत् ॥ १६ ॥
छिन्नासिचर्मा जग्राह स गदां गदिनां वरः ।
तामप्यन्यः क्षुरप्रेण चिच्छेद कृतहस्तवत् ॥ १७ ॥
अन्ये शरसहस्रेण शतेनान्ये नराधिपाः ।
बिभिदुः कोष्ठकीकृत्य धर्मयुद्धपराङ्मुखाः ॥ १८ ॥
स विह्वलः पपातोर्व्यामेको बहुभिरर्द्दितः ।
राजपुत्रा महाभागा बबन्धुस्ते च तं ततः ॥ १९ ॥
तमधर्मेण ते सर्व्वे गृहीत्वा नृपतेः सुतं ।
विशालेन समं राज्ञा वैदिशं विविशुः पुरं ॥ २० ॥
हृष्टाः प्रमुदिता बद्धन्तमादाय नृपात्मजं ।
स्वयम्वरा च सा कन्या न्यस्ता तेन ततः पुरः ॥ २१ ॥
पुनः पुनश्च पित्रोक्ता तथापि च पुरोधसा ।
आलम्ब्यतामिति वरो यस्ते राजसु रोचते ॥ २२ ॥
यदा सा मानिनी कञ्चिन्न जग्राह वरं मुने ।
तदा पप्रच्छ दैवज्ञं विवाहार्थं नरेश्वरः ॥ २३ ॥

विशिष्टतरमेतस्या विवाहाय दिनं वद ।
अद्यैतदीदृक् संजातं यद्वं विघ्नोपपादकं ॥ २४ ॥

मार्कण्डेय उवाच ॥

इति पृष्टो नरेन्द्रेण स दैवज्ञो विमृष्य तत् ।
दुर्मना प्राह विज्ञातपरमार्थो महीपतिं ॥ २५ ॥
भविष्यन्त्यपरानीह दिनानि पृथिवीपते ।
प्रशस्तलग्नयुक्तानि शोभनान्यचिरेण च ॥ २६ ॥
करिष्यति विवाहार्थं तेषु प्राप्तेषु मानद ।
अलमेतेन यत्रार्यं महाविघ्न उपस्थितः ॥ २७ ॥

इति श्रीमार्कण्डेयपुराणेऽवीक्षितचरिते ॥ १२४ ॥

---

पञ्चविंशत्यधिक शततमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततः शुश्राव तं बद्धं तनयं स करन्धमः ।
तस्य पत्नी तथा वीरा अन्ये चापि महीभृतः ॥ १ ॥
तमधर्मेण तनयं बद्धं श्रुत्वा महीपतिः ।
समस्तैः पृथिवीपालैश्चिरन्दध्यौ महामुने ॥ २ ॥
केचिदूचुर्महीपाला वध्याः सर्व्वे महीभृतः ।
यैरेकः संयुगे बद्धः समस्तैस्तैरधर्मतः ॥ ३ ॥
युज्यतां वाहिनी शीघ्रमूचुरन्यैः किमास्यते ।
विशालो वध्यतां दुष्टस्तच्च येऽन्ये समागताः ॥ ४ ॥

अन्ये तथोचुर्धर्मोऽच त्यक्तः पूर्व्वं महीक्षितैः ।
अन्यायेन बलाद्येन गृहीता तमवाञ्छती ॥ ५ ॥
स्वयम्वरेष्वशेषेष तेन राजसुतास्तदा ।
खलीकृतास्ततः सर्व्वे समेत्य स वशीकृतः ॥ ६ ॥
तेषामेतद्वचः श्रुत्वा वीरा वीरप्रजावती ।
वीरगोत्रसमुद्भूता वीरपत्नी प्रहर्षिता ॥ ७ ॥
उवाच भर्त्तुः प्रत्यक्षमन्येषाञ्च महीक्षितां ।
भद्रं कृतं भद्रभुजा मम पुत्त्रेण पार्थिवाः ॥ ८ ॥
गृहीता यद्बलात् कन्या जित्वा सर्व्वमहीक्षितः ।
तदर्थं युध्यमानोऽयं युद्ध एको न धर्मतः ॥ ९ ॥
तदप्यस्मत्सुतस्याजौ मन्ये नापचयप्रदं ।
एतदेव हि पौरुष्यं यदधर्मवशान्नरः ॥ १० ॥
नीतिं न गणयत्येवं जिघांसुरिव केशरी ।
स्वयम्वराय विन्यस्ता मम पुत्त्रेण कन्यका ॥ ११ ॥
बह्वशो गृहीता भूपानां पश्यतामतिमानिनां ।
क्व क्षत्त्रियकुले जन्म क्व याच्ञा हीनसेविता ॥ १२ ॥
बलादेव समादत्ते क्षत्त्रियो बलिनां पुरः ।
लोहशृङ्खलबद्धा वा न वशं यान्ति कातराः ॥ १३ ॥
प्रसह्यकारिणो यान्ति राजानो धर्मशालिनः ।
तदलन्दौर्मनस्येन श्लाघ्यमेवास्य बन्धनं ॥ १४ ॥
युष्माकमप्यायुधानामङ्गमूर्द्धसु पातनं ।
हत्वैव पृथिवीशानां पृथ्वीपुत्त्रादिकं वसु ॥ १५ ॥